इति वीरतन्त्रे षट्कर्म्मविवरणमष्टमः पटलः समाप्तः ।

Post Colophon :—

साक्षरेण लिखितं तन्त्रं माधवाख्येन मूढता ।

The contents of the work are given as follows on the obverse of the first leaf :—

प्रथमे गुरुक्रमाभिधानम् । द्वितीये ताराप्रकरणम् । तृतीये दक्षिणा कालिकाप्रकरणम् । चतुर्थे नित्यपूजाप्रकरणम् । पञ्चमे शवसाधनप्रकरणम् षष्ठे उच्छिष्टचाण्डालिनीसिद्धिसाधनप्रकरणम् । सप्तमे प्रचण्डासिद्धिविधि प्रकरणम् । (In a later hand) अष्टमे षट्कर्म्मविवरण ।

5927.

3457. *Vīratantram.*

Substance, country-made yellow paper. 19½ × 4½ inches. Folia, 17. Lines, 9 on a page. Extent in ślokas, 700. Character, Bengali. Appearance, fresh. Complete.

This MS contains 15 chapters like L. I. 229.

5928.

3178. **कालीविलासतन्त्रम् ।** *Kālīvilāsatantram.*

Substance, Serampore paper. 13 × 5 inches. Folia, 115. Lines, 6 on a page. Extent in ślokas, 1,100. Character, Bengali. Appearance, fresh. Complete in 35 Paṭalas.

For a full description of the work see L. IX. 2963.

After the end of the work there are four lines of a work called Rudradīpikā which begins as follows :—

सहस्रशिवपूजायामेकीकृत्य तथा दश ।
पञ्च लिङ्गानि एकत्र कृत्वा पूजाफलं लभेत् ॥

5929.

8111A. **तारातन्त्रम् ।** *Tārātantram.*

Substance, country-made paper. 13 × 4½ inches. Folia, 7. Lines, 8 on a page. Extent in ślokas, 150. Character, Bengali. Appearance, fresh. Complete.

The work, in six chapters, has been published by the Varendra Research Society of Rajshahi (1913).

5930.

3348. **कालीतन्त्रम् ।** *Kālītantram.*

Substance, country-made paper. 16 × 3½ inches. Folia, 18. Lines, 7 on a page. Extent in ślokas, 600. Character, Bengali. Appearance, discoloured. Complete in 11 Paṭalas.

Beginning :—

कैलासशिखरारूढं देवदेवं जगद्गुरुम् ।
उवाच पार्व्वती देवी भैरवं परमेश्वरम् ॥

पार्व्वत्युवाच ।

देवदेव महादेव सृष्टिस्थितिलयात्मक ।

किन्नु ब्रह्ममयं धाम श्रोतुमिच्छामि तत्त्वतः ॥

The Post Colophon Statement :—

After three lines containing Bījamantras and a verse, we have the following śloka :—

यशस्यालस्याली-ललितकरताली-द्रुमलता

क्रमाज्जाली काली हरति मतिशालीध्वजलता ।

दृढ-व्यालव्याली-घनवरुणमालीव सकलम्

कलं काली कीदृग् यदि मनसि काली विजयते ॥

अयं श्लोकः काशीस्थकेनचित् महापुरुषेण कृतो नवद्वीपे प्रकाशितः ।

[This MS was found missing at the time of printin the catalogue.]

5931.

3454. *Kālītantram.*

Substance, country-made paper. $16\frac{1}{2} \times 4$ inches. Folia, 8. Lines on a page. Extent in ślokas, 288. Character, Bengali. Appearance, fad Complete in 11 Paṭalas.

The work, in 12 chapters, has been published in t Sanskrit Sāhitya Pariṣat Series (Calcutta, 1922). T *Kālītantra* in 21 ullāsas as edited and published b Kālīprasanna Vidyāratna (Calcutta, 1892) is an entirel different work dealing with Yoga practices. The 12t chapter of the Sāhitya Pariṣat edition is absent in th present MS.

5932.

4588. *Kālītantram.*

Substance, country-made paper. 17½ × 4 inches. Folia, 1–14. Lines, 6 on a page. Extent in ślokas, 300. Character, Bengali. Appearance, old and discoloured. Incomplete in the beginning.

This MS also contains 11 chapters like the above. The present MS omits the first 9 verses of the Sanskrit Sāhitya Pariṣat edition of the work and begins from the 10th verse.

5933.

5621D. *Kālītantram.*

Substance, palm-leaf. 14 × 1½ inches. Folia, 68A–87. Lines, 4 on a page. Extent in ślokas, 320. Character, Uḍiyā. Appearance, good. Complete in 12 chapters (which do not all agree with those of the S.S.P. edition).

After the last colophon there are 7 lines, relating to offerings to she-jackals (शिवावलिप्रकार).

5934.

4589. कौलतन्त्रम् । *Kaulatantram.*

Substance, country-made paper. 16½ × 4 inches. Folia, 4. Lines, 7 on a page. Extent in ślokas, 100. Character, Bengali. Appearance, fresh. Complete in four chapters.

The work deals with the worship of Kālī and Tārā according to the Kaula form.

Beginning :—

श्रीगुरवे नमः ।

कैलासशिखरारूढं भैरवं भूतपावनम् ।

पप्रच्छ परमप्रीत्या भैरवी सफलेक्षणा ॥

भैरव्युवाच ।

देवेश परमेशान किं त्वया जप्यतेऽनिशम् ।
किन्तद्ब्रह्ममयं धाम किम्वा तस्य जपात्फलम् ॥
विधिना केन देवेश साधनीयं वदस्व तत् ।

भैरव उवाच ।

किं जानामि वरारोहे स्वरूपं तस्य भाषितम् ॥
यदाज्ञातं शङ्करेण गुरुणा मम सुन्दरि ।
तत्सर्व्वमवदत्तुभ्यं शङ्करः स महेश्वरः ॥
तथापि नरलोकानां परित्राणाय पृच्छसि ।
अतएव प्रवक्ष्यामि यद + + सुलोचने ॥

End :—

इति ते कथितं कौलतन्त्रमुत्तमलक्षणम् ।
हृदिस्थं तारिणीदेव्या बौद्धदेवेन भाषितम् ॥

Colophons of the different chapters :—

2A, इति कौलतन्त्रे ताराकल्पे तारारहस्यं नाम प्रथमः पटलः; 3B, इति कौलतन्त्रे ताराकल्पे ताराचारो नाम द्वितीयः पटलः; 4B, इति कौलतन्त्रे कालीकल्पे तृतीयः पटलः; इति कौलतन्त्रे कालीकल्पे चतुर्थः पटलः ।

After the colophon there are two verses quoted from the *Tārākalpa* referring to the excellence and functions of Kaulas.

5935.

3167. निरुत्तरतन्त्रम् । *Niruttaratantram.*

Substance, country-made paper. 15 × 3½ inches. Folia, 30. Lines, 7 on a page. Extent in ślokas, 725. Character, Bengali. Appearance, discoloured. Incomplete.

The present MS contains chapters 1 to 14 and one line and a half of the 15th. The work has been printed, in 15 chapters, in the *Tantrasaṅgraha* as also in the *Sulabha tantraprakāśa*. It has been described in L. I. 285 and HPR. I. 206.

5936.

4669. *Niruttaratantra.*

Substance, country-made paper. 16½ × 6 inches. Folia, 30. Lines, 10 on a page. Extent in ślokas, 1,196. Character, Bengali. Appearance, discoloured. Complete.

The present MS contains 15 chapters.

5937.

5973. निरुत्तरभट्टारकम् । *Niruttarabhaṭṭāraka.*

Substance, country-made paper. 11 × 5½ inches. Folia, 8B–17. Lines, 11–14 on a page. Extent in ślokas, 300. Character, Nāgara. Appearance old. Complete in five chapters.

The work deals with Yoga.

Beginning :—

श्रीगणेशाय नमः । श्रेयसे ।

ॐ नमः शिवाय ॥

नमो माया द्विकङ्काल ग्रास कुलान्तकृत् (?) ।
व्योमातीतं निराभासं स्पन्दनास्पन्दवर्ज्जितम् ॥
अलम्बा सर्व्वमालम्बं निरालम्बं निराकृतिं ।
गुणागुणपरिभ्रान्तिनिष्क्रान्तिशक्तिसागरम् ॥
... ...
... ...

श्रीदेव्युवाच ।

महा-संशय मे नाथ मायाध्वप[रि]वर्त्तिनम् ।
अनेन भेदगूढार्थं श्रुतं मे इन्द्रजालवत् ॥
सिद्धान्तं तत्र वै शेषं ज्ञानभेदं कुलागमम् ।
महार्थगमनं चैव तत्त्वार्थगहनं तथा ॥

शब्दार्थं नैव जानामि पदवाक्यप्रमाणतः ।
भ्रान्तबुद्धिरहं देव भ्रामिता + + शासने ॥
केनोपायेन देवेश ज्ञातव्यं सर्व्वरूपतः ।
येनेदं ज्ञायते सत्यं दम्भशाठ्यविवर्ज्जितम् ॥
नन्दि(क)स्कन्दकुमाराद्यैर्भृंगिना योगिनीकुलैः ।
मुनिभिर्ब्रह्म + + + सूर्य्यचन्द्रमसादिभिः ॥
कथितं परमं ज्ञानं न स्थानं त्रिविधं मम ।
तदादिकं यदस्तीति वद मे सुरनायक ॥
नित्यभक्ता त्वहं देव कर्म्मणा मनसा गिरा ।
प्रसादं कुरु संक्षेपादाक्षेपाद्येन मुच्यते ॥
आयासरहितं ज्ञानं प्राणायामविवर्ज्जितम् ।
धारणाध्याननिर्मुक्तं योगतत्त्वविवर्ज्जितम् ॥
ब्रह्मयज्ञक्रियाहीनं निष्क्रियं तीर्थवर्ज्जितम् ।
प्रसन्नात्मं जगन्नाथ वदैतद्भक्तवत्सलम् ॥

9B, श्रीभैरव उवाच ।

कथयामि यथातथ्यं कपटज्ञानवर्ज्जितम् ।
भ्रमभ्रान्तिं परित्यज्य ग्राहयेत् परमं पदम् ॥
धानान्तकरणैर्मुक्तं स्नानपंचदिकैरपि(?) ।
चिन्तया रहितं चित्तं निश्चितं परमं पदम् ॥
कुम्भपूरकरेचाद्यैः प्रशान्तपवनैः सह ।
दशवायोः सुवृन्दानि दशसाहस्रिका[णि] च ॥
प्रत्येकं च सहस्रात्मा प्राणाद्यास्त्र धनञ्जयः ।
दशसाहस्रनाड्यङ्गं संस्थितं कुलमध्यगम् ॥
वायुवृन्दं परित्यज्य तत्त्ववृन्दं तथैव च ।
मन्त्रजालं महादुर्गं क्रियाजालं परित्यज्य ॥
शास्त्रजालमनेकार्थं त्यज सर्व्वं पलालवत् ।

Colophons of the different chapters :—

9A, इति भैरवस्रोतसि निरुत्तरभट्टारके प्रथमः पटलः; 11B, इति भैरवस्रोतसि संग्रहे निरुत्तरे द्वितीयपटलः; 12A, इति भैरवस्रोतसि निर्गते निरुत्तरे तृतीयः पटलः; 14A, ०चतुर्थः पटलः; 17B, इति भैरवस्रोतसि निर्गते निरुत्तरभट्टारके पञ्चमः पटलः। समाप्तं निरुत्तरभट्टारकं नाम योगशास्त्रम्।

5938.

5220. तोडलतन्त्रम्। *Toḍalatantra.*

Substance, country-made paper. 11½ × 2¾ inches. Folia, 26. Lines, 6 on a page. Extent in ślokas, 490. Character, Bengali. Appearance, fresh. Complete in 10 chapters.

The work, in ten chapters, has been printed in the *Vividhatantrasaṃgraha* and the *Sulabhatantraprakāśa.* L. I. 385 is stated to contain the beginning of an 11th chapter.

5939.

4652. वामकेश्वरतन्त्रम्। *Vāmakeśvaratantra.*

Substance, country-made yellow paper. 19½ × 4¼ inches. Folia, 11. Lines, 6 on a page. Extent in ślokas, 232. Character, modern Bengali. Appearance, fresh. Incomplete.

The present manuscript contains Paṭalas LI to LV dealing with topics like *Abhiṣeka, Pūrṇābhiṣeka* and festivities (*yātrās*) in honour of Śakti like those in honour of Viṣṇu.

The 51st Paṭala begins :—

भैरव्युवाच।

ऐक्यज्ञानं महादेव कथमुत्पद्यते प्रभो।
नराकृतिं गुरुं मन्ये देवताञ्च शिलामयीम्॥

मन्त्रश्चाक्षररूपश्च कथमैक्यं भवेच्छिव ।
भावाः कतिविधा देव आचारा विविधाः कथम् ॥
आश्रमाणाञ्च देवेश को मम प्रियवानहो ।
एवं सर्व्वं महादेव विशेषेण ब्रवीषि मे ॥

The 55th Paṭala ends :—

एवं साम्वत्सरीं यात्रां कृत्वा साधकसत्तमः ।
गुरोः प्रसादाद्देवेशि शिवतुल्यो न संशयः ॥

Colophon :—

इति श्रीवामकेश्वरतन्त्रे भैरवभैरवीसंवादे यात्राप्रकरणं नाम पञ्चपञ्चाशत् पटलः ॥

5940.

3446. *Vāmakeśvaratantra.*

Substance, country-made paper. $15\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 13. Lines 9 on a page. Extent in ślokas, 460. Character, Bengali. Appearance discoloured. Complete in five Paṭalas.

This MS contains the first five chapters of the Nityā-ṣoḍaśikārṇava section of the work. This section with the commentary of Bhāskararāya has been published in the Ānandāśram Sanskrit Series of Poona (1908). The fifth chapter, though stated to be complete in the present MS, runs only up to verse 34 of the printed edition which contains 44 verses.

The colophons here are fuller than those found in the printed edition of the work.

The last colophon runs :—

इति श्रीवामकेश्वरतन्त्रे सर्व्वतन्त्रोत्तमे बज्ररूपाष्टकप्रस्तावे त्रिपुराजपहोमविधिः पटलः पञ्चमः ।

Post Colophon :—

श्रीपरमदेवतायै नमः ॥ श्रीकृष्णानन्दशर्म्मणामिदं पुस्तकम् ॥

5941.

3162. *Vāmakeśvaratantra.*

Substance, country-made yellow paper. 14 × 3 inches. Folia, 15. Lines, 6 on a page. Extent in ślokas, 380. Character, Bengali. Appearance, fresh. Incomplete.

Same as above. This MS, however, contains the first three chapters and a portion of the fourth.

5942.

2792. वामकेश्वरतन्त्रे [योगिनीहृदयम्] ।

Yoginīhṛdayam from the Vāmakeśvaratantra.

Substance, country-made paper. 12½ × 3 inches. Folia, 17. Lines, 9 on a page. Extent in ślokas, 350. Character, Bengali. Appearance, dilapidated. Complete.

Yoginīhṛdaya is the title of the last three chapters of the Vāmakeśvaratantra, the *Nityāṣoḍaśikārṇava* section of which, containing the *Yoginīhṛdaya* as its concluding part, has been published in the Ānandāśram Sanskrit Series of Poona. The *Yoginīhṛdaya* section alone has been published with the commentary of Amṛtānandanātha in the *Prince of Wales Saraswati Bhavana Texts* Series of Benares (1923-4).

5943.

2793. *Yoginīhṛdayam from the Vāmakeśvaratantra.*

Substance, foolscap paper. 18½ × 5 inches. Folia, 10. Lines, 8 to 10 on a page. Extent in ślokas, 324. Character, Bengali. Appearance, fresh. Incomplete.

This MS contains the first chapter (Fol. 1–4A), 67 verses and a half of the second chapter (Fol. 4A–6A),

105 verses and a portion of verse 106 of the third chapter (Fol. 7B–10B). In Fol. 6A-7B a portion of Amṛtānanda's commentary (e.g. on verses 6–13 of the first chapter) is found.

5944.

4585. *Yoginīhṛdayam from the Vāmakeśvaratantra.*

Substance, country-made yellow paper. 16½ × 4 inches. Folia, 32. Lines, 6 on a page. Extent in ślokas, 768. Character, modern Bengali. Appearance, fresh. Complete.

Besides the three well-known chapters (चक्रसङ्केत, मन्त्रसङ्केत and पूजासङ्केत) of which the work consists, there are three more chapters in this MS as in L. I. 282.

5945.

1708. *Yoginīhṛdayam from the Vāmakeśvaratantra.*

Substance, country-made paper. 9½ × 4 inches. Folia, 13. In tripāṭhī form. Character, Nāgara. Date, Saṃvat 1779. Appearance, old. Incomplete.

The present MS contains only the first chapter. It is accompanied by the commentary योगिनीहृदयदीपिका by Amṛtānandanātha, a disciple of Puṇyānandanātha.

Post Colophon Statement :—

संवत् १७७९ वैशाख कृष्णैकादश्यां रवौ लिखितमिदं वैद्यनाथ सुतेन विष्णुदेवेनेति शिवम् ॥

ऊर्द्धाम्नायगुरूपदेशभुवनं ॐकारसिंहासनं
सिद्धाचार-समस्त-वेदमथनं षट्चक्रसंभेदनम् ।
पश्चाद्वै शिवतत्त्वज्योतिरमलं पूर्णं प्रभाशोभितम्
शांतं सद्गुरुपादुकां भज मनश्चैतन्यचन्द्रोदयम् ॥ १ ॥

निर्वैरीकरणं मदापहरणं वह्नेर्विना ज्वालनं
नाडीचालन-नादविन्दुकलनं देहस्य संशोधनम् ।
आत्मज्योतिनिदर्शनं कलयितं स्वच्छन्दमृत्युंजयम्
एवं ह्यात्मविदो वदन्ति सहरां चिन्मात्रमूर्त्तिं भजे ॥ २ ॥
जगद्वन्द्यावेतौ गणपवटुकौ विश्वविनुतौ
जगद्रक्षाशीलौ जपनिरतसाहित्यवरदौ ।
रथाङ्गे सन्नद्धौ रविशशिकृशानूज्ज्वलदृशौ
मयि स्यातां रक्षापरवशधियौ सद्गुणमयौ ॥ ३ ॥

The introductory verse of the commentary, as found in L. I. 283 and in the printed edition of the work, is not given as such in this MS, but is given as the last verse of the post-colophon statement as quoted above.

5946.

8661. **योगिनीहृदयदीपिका ।** *Yoginīhṛdayadīpikā.*

By Amṛtānandanātha.

Substance, country paper. 11 × 4 inches. Folia, 109 (1–30 + 1–29 + 1–50). Lines, 10 on a page. Extent in ślokas, 3,200. Character, Nāgara. Date, Saṃvat 1853. Appearance, fresh. Complete.

Post Colophon Statement :—

सम्वत् १८५३ मिति भाद्रपद वद्य प्रतिपद्यां भृगौ वैंथसुं
लिखितं लेखकपाठकयोः शुभं भवतु । नमस्त्रिपुरसुन्दर्य्यर्पणमस्तु ॥

5947.

3917D. **सिद्धिवीरेश्वरीतन्त्रम् ।** *Siddhivīreśvarītantra.*

Substance, country-made paper. 14½ × 4½ inches. Folia, 38B–39A. Lines, 11 on a page. In Tripāṭha form. Character, Bengali. Appearance, old and discoloured. Incomplete.

This MS contains only the fifth chapter of the work.

Beginning :—

अथातः संप्रवक्ष्यामि सिद्ध्युपायं प्रियेश्वर ।
अज्ञात्वा + + का देवि अजप्त्वा गुरुपादुकाम् ॥
रात्रौ पर्य्यटनं नास्ति साधकः (कौकिलः) [कौलिकः] कथम् ।
कथं मन्त्राश्च सिध्यन्ति मन्त्रार्थज्ञानतः प्रिये ॥
कुल्लुका मूर्द्ध्नि संजप्त्वा हृदि सेतुम्विचिन्तयेत् ।
महासेतुं विशुद्धौ तु सहस्रारे विचिन्तयेत् ॥

End :—

तथा जपादिकं सर्व्वं निष्फलं नात्र संशयः ।
तस्मात् सर्व्वप्रयत्नेन प्रजपेत्मूर्द्ध्नि कुल्लुकाम् ॥

Colophon :—

इति श्रीसिद्धिविरेश्वरीतन्त्रे कर्णिकापटलः पञ्चमः ।

5948.

5465. सिद्धयोगेश्वरीतन्त्रम् । *Siddhayogeśvarītantra.*

Substance, Nepalese paper. 12 × 3¼ inches. Folia, 2–73. Lines, 6 on a page. Extent in ślokas, 1,300. Character, Newari. Date, N.S. 793. Appearance, fresh. Incomplete.

The MS from which the present MS was copied was apparently defective, for occasional lacunæ are met with in the latter, as in the 18th leaf which contains only two lines. It contains 32 chapters. The work is differently called *Siddhayogeśvarītantra*, °*mata* in different colophons and *Bhairavavīrasaṃhitā* in one colophon (Fol. 45A).

Colophons of the different chapters :—

2B, इति सिद्धयोगेश्वरीतन्त्रे प्रथमः पटलः; 4B, इति सिद्धयोगेश्वरीतन्त्रे व्याप्तिपटलो द्वितीयः; 8A, इति सिद्धियोगीश्वरीमते शक्तित्रयोद्धारस्तृतीयः पटलः; 8B, ०विद्याङ्गोद्धारश्चतुर्थः पटलः; 9A, इति लोकपालोद्धारः पञ्चमः

पटलः; 12B, इति समयमण्डलपटलः षष्ठः; 15A, इति सिद्धयोगीश्वरीतन्त्रे सप्तमः पटलः; 19B, इति सिद्धियोगेश्वरी नवमः पटलः; 20B, इति विद्याव्रत-पटलो दशमः; 21B, इति सिद्धेश्वरीमते एकादशमः पटलः; 23A, इति सिद्ध-योगीश्वरीमते द्वादशमः पटलः; 24B, सिद्धियोगीश्वरमते त्रयोदशमः पटलः; 24B, इति सिद्धियोगीश्वरमते पञ्चदशमः पटलः; 28A, इति सिद्ध-योगीश्वरीमते षोडशमः पटलः; 32A, इति सिद्धयोगेश्वरीमते सप्तदशमः पटलः; 34A, इति सिद्धयोगेश्वरीमते अष्टादशमः पटलः; 35B, इति सिद्धि-योगीश्वरीमते एकोनविंशतितमः पटलः; 42A, इति सिद्धयोगेश्वरीमते खचक्रव्यूहविंशतिमः पटलः; 45A, भैरववीरसिंहता[या]मेकविंशतिमः पटलः; 47B, इति योगिनीचक्रनिर्णयं द्वाविंशतितमः पटलः; 50A, इति सिद्ध-योगेश्वरीमते त्रयोविंशतिमः पटलः; 52B, इति चक्रोद्धारणमिदं चतुर्विंशतिमः पटलः; 58B, इति सिद्धयोगेश्वरीमते सिद्धिमण्डलविन्यासपञ्चविंशतिमः पटलः; 62B, इति सिद्धयोगेश्वरीमते मेलकाख्यषड्विंशतिमः पटलः 65B, ०सप्तविंशतिमः पटलः; 68B, ०अष्टाविंशतिमः पटलः; 71B, ०एकोनत्रिंशतिः पटलः; 72A, ०त्रिंशतिमः पटलः; 73A, ०एकत्रिंशतिमः पटलः; last colophon, इति सिद्धयोगेश्वरीमते द्वात्रिंशतिमः पटलः समाप्त ।

Post Colophon Statement :—

नेपालवत्सरे जाते वह्निरन्ध्रसमुद्रके ।
अनन्तसिंहलिखितं सिद्धयोगेश्वरीमतम् ॥
पुस्तकलिखनपरिश्रमज्ञो विद्वज्जनो नान्यः ।
सागरलङ्घनखेदं हनूमानेकः परं वेत्ति ॥

5949.

183. नीलतन्त्रम् । *Nīlatantra.*

Substance, country-made paper. 15 × 5½ inches. Folia, 25. Lines, 7 on a page. Extent in ślokas, 700. Character, Bengali. Appearance, fresh. Complete in 17 chapters.

This MS is described in L. I. 463. L. I. 215 seems to be the MS of a different work though it bears

the same name. The present MS contains 17 chapters, whereas the printed editions of it as published in the *Vividhatantrasaṃgraha* and in the *Sulabhatantraprakāśa* contain 12 chapters.

The succession of Gurus for Nīlasarasvatīvidyā i given in Fol. 7A as follows :—

ऊर्द्धकेशो व्योमकेशो नीलकण्ठो वृषध्वजः ।
दिव्यौघा[ः] सिद्धिदा वत्स सिद्धौघान् शृणुताग्रतः ॥
वशिष्ठः कूर्चनाथश्च नीलनाथो महेश्वरः ।
हरिनाथ (वा)मानवौघान् शृणु वक्ष्यामि सद्गुरून् ॥
भवावती भानुमती जया विद्या महोदरी ।
सुखानन्द परानन्द पारिजातः कुलेश्वरः ॥
विरूपाक्षो देवहूती कथितं तारिणीकुलम् ।

Buddhist deities like Akṣobhya and Amitābha a here referred to as follows :—

Fol. 7B :—

अनेन मनुना देवि परिवारान् समर्चयेत् ।
अक्षोभ्यं वज्रपुष्पाद्यैः तारिणीमूर्द्धि पूजयेत् ॥
यथा वैरोचनं शङ्खं पाण्डरं पद्मनाभकम् ।
अमिताभं यजेन्मन्त्री चतुर्दिक्षु चतुर्दले ॥

A good many Tantras are here referred to as follo (Fol. 17B) :—

शिव उवाच ।

श्रुतं भैरवतन्त्रञ्च योनितन्त्रं कुलार्णवम् ।
कुलाचारं तथा गुप्तसाधनं गुरुतन्त्रकम् ॥
निर्व्वाणं समयाचारम् वीरतन्त्रं श्रुतं पुरा ।
डामरं डामरोड्डीशं श्रुतं कालीविलासकम् ॥
सप्तकोटिमहाग्रन्थं मम वक्त्रविनिर्गतम् ।
जामलं देवि ब्रह्माद्यं जामलं विष्णुजामलम् ॥

शिवजामलकं देवि जामलं मिश्रजामलम् ।
शक्तिजामलकं देवि कथितञ्च श्रुतं त्वयि ॥
तथापि हृदयग्रन्थिरस्ति ते परमेश्वरि ।
पुरा सुकथितं तन्त्रं पुरा देवि त्वया श्रुतम् ॥
सङ्केतं समयाचारं तन्त्रसङ्केतकं तथा ।
कुलसङ्केतकं नाम सङ्केतं बहुविस्तरम् ।
श्मशानसाधनं भद्रे शवसाधनमेव च ॥
22A, एवं विधानसम्भूतं श्रुतं तन्त्रञ्च मोहनम्
कु(ली)लोड्डीशं कुलीनस्य योगिनीहृदयं श्रुतम् ।
सम्मोहनं वीरतन्त्रं श्रुतं श्रीतन्त्रमुत्तमम् ।
कुलार्णवं तथा कालीतन्त्रं कालीविलासकम् ॥
श्रीकालीकल्पलतिका श्रुता परमसादरात् ।
मतभेदे च गुप्ता सा पूजाप्रकटनाशिनी ॥

5950.

3165. *Nīlatantra.*

Substance, country-made paper. 17 × 4 inches. Folia, 28. Lines, 6–8 on a page. Extent in ślokas, 750. Character, Bengali. Appearance, old and discoloured. Complete.

The present MS contains 15 chapters. This work does not agree with the one described under the previous No. or with the printed edition of the work of the same name. The beginning agrees with that of *Bṛhannīlatantra* in 9 chapters, published in the *Sulabhatantraprakāśa* and the *Tantrasaṃgraha*, and with that of a MS of it in 23 chapters as described in L. IV. 1655.

Colophons of the different chapters :—

2A, इति नीलतन्त्रे सर्व्वतन्त्रोत्तमोत्तमे भैरवपार्व्वतीसंवादे सिद्धमन्त्रकथनं नाम प्रथमः पटलः; 4B, इति नीलतन्त्रे भैरवपार्व्वतीसंवादे सपर्य्याविधिर्नाम द्वितीयः पटलः; 5B, इति श्रीनीलतन्त्रे यन्त्रानुष्ठानविधिर्नाम तृतीयः पटलः;

6A, इति श्रीनीलतन्त्रे पुरश्चरणविधिर्नाम चतुर्थः पटलः ; 7A, इति श्रीनीलतन्त्रे सर्व्वतन्त्रोत्तमोत्तमे होमविधिर्नाम पञ्चमः पटलः ; 7B, ०तर्पणविधिर्नाम षष्ठः पटलः ; 12B, ०भैरवपार्व्वतीसंवादे सप्तमः पटलः ; 14B, ०अष्टमः पटलः ; 18A, ०नवमः पटलः ; 20B, ०दशमः पटलः ; 21A, इति श्रीनीलतन्त्रे तारिणीस्तोत्रं समाप्तम् ; 22A, ०एकादशः पटलः ; 24A, ०द्वादशः पटलः ; 26A, ०त्रयोदशः पटलः ; 26B, इति श्रीनीलतन्त्रे सर्व्वतन्त्रोत्तमोत्तमे चतुर्द्दशः पटलः ; 28A, ०पञ्चदशः पटलः ।

5951.

323. शक्तिसङ्गमतन्त्रम् । *Śaktisaṅgamatantra.*

Substance, country-made paper. 18 × 4 inches. Folia, 1–319. (T number of folia should really be 309 as after Fol. 56 the numbers 67 e are given in place of 57, etc.) Lines, 7, 8 on a page. Extent in ślokas, 8,9 Character, Bengali. Date, Śaka 1674. Appearance, old. Incomplete.

The first part of this work in 21 chapters has b published in the Gaekwad's Oriental Series (Baro 1932) as also by P. Sarma (Bharat Subhacintak Pre Deoghar). This MS has been described in L. I. 405. T work is also described in I.O. IV. 2589 and Bik., No. 132

The numbers of chapters are occasionally wrong indicated. Chapters 18ff in the first part of the work a 17ff in the third are respectively indicated through ina vertence as chapters 17ff and 16ff. Thus these parts rea consist of 21 chapters each and not of 20 as would appe from the last colophons. Also according to I.O. (*loc. c* the first part contains 20 chapters, the last of which agre with the 21st chapter of the printed edition.

In Book II (Fol. 78A–198) colophons of chapte 10–18 and of chapters 21-22 and 27, are not found. Tw chapters are indicated as 25 (Fol. 134A and 135B

After the colophon of chapter 34 (Fol. 144B) is found the colophon of a chapter 30 (Fol. 146B). Presumably chapter 46 is wrongly indicated as 36 (Fol. 168A). This Book runs up to a portion of chapter 63 and not 65 as would appear from the description in L.

In Book III (Fol. 198, 201A–254A) the first two chapters are missing and the colophons of chapters 4–9 are not found.

In Book IV (Fol. 254–319A) the last chapter appears to be 11th and not 10th as given in the colophon, for 10 chapter-colophons are already found in the previous portions of the MS.

The names of the different parts of the work are not clearly mentioned in the colophons. The name *Tārāsūkta* occurs in the colophons of chapters 12 and 14 of Part I, chapters 25, 40, 51, 52, and 53 of Part II, chapters 4–10 of Part IV. The names *Tapasyākhaṇḍa* and *Kālīkhaṇḍa* are found respectively in the colophons of chapters 10 and 11 of Part III.

5952.

4337. *Śaktisaṅgamatantra.*

Substance, country-made paper. 16½ × 4½ inches. Folia, 1–72. Lines, 7 on a page. Extent in ślokas, 1,800. Character, Bengali. Appearance, fresh. Incomplete.

The present MS contains chapters XXIV–LVII of the second part of the work. The introductory portion of chapter XXIV is not found here. Of the 57th chapter we have here only the beginning.

5953.

4775. परातन्त्रम् । *Parātantra.*

Substance, Nepalese paper. $9\frac{1}{4} \times 2\frac{3}{4}$ inches. Folia, 1–45 of which Fol 3 is missing. Lines, 6 on a page. Extent in ślokas, 680. Character Newari. Appearance, old and discoloured. Complete.

The chapters are not indicated in the present MS but it is divided into sections the names of which are indicated by sectional colophons. On comparing it with the next MS it is found that the first six sections of this MS comprise the first chapter, and the other three sections comprise respectively the 2nd, 3rd, and 4th chapter of the work. The work has been described in IO. IV. 259.

Beginning :—

ॐ नमः श्रीपरायै ।

बज्रसिद्धिसमाकीर्णे श्मशाने करवीरके ।
तत्र वीरगणाः सर्व्वे महाहल्लोलजङ्गृते ॥
निवृत्तितमहाचक्रे योगे त्रिदशडामरे ।
महानन्दे महास्फारे गणडाकिनीयाचिते ॥
ब्रह्माद्या मातरश्चाष्टौ क्षेत्रेशो भैरवादयः ।
गणेशवटुकाः सिद्धिः माटचक्रे तु मेलके ॥
श्रीनाथादिगणाः सर्व्वे वीरनाथावतारिते ।
सिद्धिनाथां प्रकाशेन सन्तोषितकुलेश्वरः ॥
सर्व्वभूषां परित्यज्य सानन्दोल्लासिमानसः ।
सामरस्यस्थितं देवं पृच्छते कुलसुन्दरी ॥

श्रीदेव्युवाच ।

सर्व्वशम्भो भवज्ञानं त्वत्प्रसादाच्छ्रुतं मया ।
यामलाष्टकपूर्व्वन्तु तन्त्रानेकाविधानि च ॥

शिरश्छेदश्च वज्रधा महामशानषट्कम् ।
परातन्त्रे च चित्कारसागरं वा महामतम् ॥
चतुर्विंशति वै लक्षा श्रुताः सर्व्वेपि धारिताः ।
इदानीं संशयो जातो तवैव वचनात् प्रभो ॥
एका सा परमा शक्तिः न द्वितीया परेश्वरि ।
एका शक्ति[:] महामाया विश्वं व्याप्य व्यवस्थिता ॥
नादिमध्या न चान्तास्तु यया सर्व्वं प्रवर्त्तते ।
त्वयोक्ता न द्वितीया सा तन्त्रे कुलकुलार्णवे ॥
एषा संधार्य्यते विश्वं एका त्रैलोक्यपूजिता ।
एतदेव च यो ब्राह्मी षडाम्नाय कथं प्रभो ॥
षट्सिंहासनगा प्रोक्ता देव्यः षन्नायिका स्मृता ।
षडाम्नायविभिन्ना चेदेका सा परमा कथम् ॥
अभिन्नाप्यथ भिन्ना चेद्वद देव जगत्पते ।
कथमेका पराशक्ति[:] विभिन्ना परमेश्वरी ॥
षट्सिंहासनगा देवी नायिका षट् प्रकीर्त्तिता ।
षडाम्नायविभिन्ना चेत् किं संज्ञाभेदनामतः ॥
पूर्व्वसिंहासना देवी याम्यसिंहासने स्थिता ।
सिंहासन पश्चिमाशां सौम्ये सिंहासना परा ॥
सिंहासनमूर्द्ध्वगता ह्यधः सिंहासनास्तथा ॥
षट्सिंहासनसंस्थिता षडाम्नायेति कीर्त्तिता ।
कथं सिंहासनं संज्ञा स्थिताह्याम्नाये देवता ॥
तन्त्रे वा यामरे वापि चतुर्विंशतिलक्षके ।
ग्रन्थे त्वया सूचिका वै षडाम्नाय विशेषतः ॥
एका परा विभिन्ना किं षट्सिंहासनमाश्रिता ।
आद्या शक्तिः परामेका कथं षट्शक्तितां गता ॥
यामाद्या प्रकृती सूक्ष्मा चितिरूपेण संस्थिता ।
विन्दमालिनीरूपा सा सर्व्वे व्याप्य व्यवस्थिता ॥

एतन्मे महतीं शङ्का निर्णेतुं परमेश्वरीम् ।
हृदयग्रन्थिसुदृढं सर्व्वज्ञा परमेश्वर ॥
यद्येका परमा शक्तिराद्या प्रकृतिरीश्वरी ।
किमर्थं कस्य रक्षार्थं षडाम्नाय प्रकीर्त्तिता ॥

End :—

इत्येतत्तु समाख्यातं कालिकायाः कुलक्रमम् ।
विधानं परमं दिव्यं शास्त्रे कालिक्रमागते ॥
गोपनीयं प्रयत्नेन न दद्याद् यस्य कस्यचित् ।
गुरुभक्तिरतो यो हि महाशास्त्रमयी तु सा ॥
रम्यपुष्पफलं दृष्ट्वा वस्त्रारङ्कारमेव च ।
स्वात्मप्रियाणि भव्यानि यत्किञ्चित् भुवि दुर्ल्लभम् ॥
गुरवे प्रथमं दत्त्वा ततः स्वात्मनि धारयेत् ।
गुर्व्वागमक्रमारिसा पूजाकारे प्रजापयेत् ॥
गुरुसन्तुष्टमानेन सन्तुष्टा कालिकाक्रमम् ।
येनेदं लिखेतेच्छास्त्रं यस्य हस्तेषु तिष्ठते ॥
यत्र स्थितं प्रपूज्यन्ते विधिवत् परमेश्वरी ।
सनिर्विघ्नन्तु षण्मासं यावज्जीवति चैव हि ॥
पुस्तकं पूजितं येन इदं कालिकुलक्रमम् ।
समग्रं पूजितं तेन कालि कालविनाशिनी ॥
आब्रह्मस्तम्भसकलं कालेन कलयेत् सदा ।
तं कालं कालिका देवी कारयेत् सा युगे युगे ॥
न कालिसदृशी यज्ञो न कालिसदृशी तपः ।
न कालिसदृशी धर्म्म न कालिसदृशी भुवि ॥
जीवन्मुक्तः स विज्ञेयो महापाशुपतः स वै ।
महायोगी विजानीहि कालिकापथसंश्रिता ॥
अहं मृत्युंजयो देवो मङ्गलार्चनतोभवत् ।
कलौ विशेषतः काली पूजितव्या प्रयत्नतः ॥

देवतासंयुतं विघ्नं वर्ज्जितस्थानकं प्रिये ।
यो ज्ञाता भैरवो देवो श्रोता रुद्रसमो भवेत् ॥
स एकधा च बहुधा साधकानां हिताय च ।
नानातन्त्रप्रवाहास्तु नानाम्नायत्वमागता ॥
तन्त्रभेदे नामभेदा एका शक्तिः सहस्रधा ।
मङ्गला च महामाया चण्डा कापालिनी शिवा ॥
चामुण्डा चर्च्चिका चण्डा सृष्टिस्थित्यन्तकालिनी ।
अनाख्या च महाभासा गुह्यकाली जया परा ॥
सिद्धिलक्ष्मीर्विश्वलक्ष्मीर्महाप्रत्यङ्गिरा स्मृता ।
सुन्दरी त्रिपुरा चारु उग्रचण्डा प्रकाशिनी ॥
विभिन्ना बहुधा जाता नानाभेदसमाश्रिता ।
एका सानेकरूपा च यानि या दिव्यचक्षुषा ॥
स एव साधकः श्रेष्ठः सिद्धिज्ञानस्य भाजनम् ।
अनुष्ठानरता सर्व्वं सिद्धिभागी भवेद्ध्रुवम् ॥

Colophons of the different sections of the work :—

Fol. 6B—इति श्रीपूर्णेश्वरी पूर्व्वाम्नायः ।

Fol. 8B—इति श्रीपरातन्त्रे निःशेश्वरी दक्षिणाम्नाय ।

Fol. 11A—इति श्रीपरातन्त्रे पश्चिमसिंहासने कुब्जिका ॥ ३ ॥

Fol. 13A—इति श्रीपरातन्त्रे उत्तराम्नाय कालिक्रमः ॥ ४ ॥

Fol. 17B—इति श्रीपरातन्त्रे श्रीविद्या ऊर्द्ध्वाम्नायः ॥ ५ ॥

Fol. 18B—इति श्रीपरातन्त्रे महास्रोतसि शिरश्छेदे करवीरमहायागे परातन्त्रे क्रमे द्वादशसाहस्रिकायां षडाम्नायभेदसूत्रम् ॥ ६ ॥

[Here ends the first Paṭala.]

Fol. 32B—इति श्रीमहास्रोतसि शिरश्छेदे करवीरयागे परातन्त्रे क्रमे द्वादशसाहस्रिकायां कालिक्रमनिर्णयसूत्रम् ॥ २ ॥

[Here ends the second Paṭala.]

Fol. 38A—इति श्रीमहास्रोतसि शिरश्छेदे करवीरयागे परातन्त्रे परमार्थनिर्णयः ।

[Here ends the third Paṭala.]

Fol. 45B—इति श्रीमहास्रोतसि शिरश्छेदे महाकरवीरयागे परातन्त्रे कालिकुलक्रमः समाप्तः ।

[Here ends the fourth Paṭala.]

5954.

4779. *Parātantra.*

Substance, Nepalese paper of yellow colour. $9\frac{1}{4} \times 4\frac{1}{2}$ inches. Folia, 4 Lines, 9 on a page. Extent in ślokas, 500. Character, Nāgara. Appearanc fresh. Complete.

Same as above.

Colophons of the different chapters which are number in this MS :—

Fol. 18A—इति श्रीपरातन्त्रे पार्व्वतीश्वरसंवादे षडाम्नायक्रमकथनं प्रथमपटलः ।

Fol. 30B— ०कालीकुलक्रमनिर्णयं नाम द्वितीयपटलः ।

Fol. 36B— ०परमार्थनिर्णयकथनं नाम तृतीयपटलः ।

Fol. 43B— ०पुरश्चरणक्रमकथनं नाम चतुर्थपटलः समाप्तः ।

5955.

10725. *Parātantra.*

Substance, country-made paper. $12 \times 3\frac{3}{4}$ inches. Folia, 9. Lin on a page. Extent in ślokas, 243. Character, modern Newari. Saṃvat, 287 (?). Appearance, fresh. Complete.

The present MS contains only the first chapter of work.

Post Colophon :—

संवत् २८७ मिति स्वार्थेन लिखित्वा ।

The date, given here, is not borne out by the handwriting, which is very modern.

5956.

3400. तन्त्रचूडामणौ महापीठनिरूपणम् ।

Mahāpīṭhanirūpaṇa from the Tantracūḍāmaṇi.

Substance, country-made paper. 10 × 3½ inches. Folia, 3. Lines, 9 on a page. Extent in ślokas, 66. Character, Bengali. Appearance, very old and faded. Complete.

This work describes 51 *pīṭhas* while the work noticed under No. 5880 above describes 18.

Beginning :—

श्रीश्वर उवाच ।

मातः परात्परे देवि सर्व्वज्ञानमयीश्वरि ।
कथ्यतां मे सर्व्वपीठशक्तिभैरवदेवता ॥

देव्युवाच ।

शृणु वत्स प्रवक्ष्यामि दयालो भक्तिवत्सल ।
याभिर्विना न सिध्यन्ति जपसाधनतत्क्रिया[:] ॥
एकपञ्चाशतं पीठं शक्तिभैरवदेवता ।
अङ्गप्रत्यङ्गपातेन विष्णुचक्रक्षतेन च ॥
+ + + वपुषा देवहिताय त्वयि कथ्यते ।
ब्रह्मरन्ध्रं हिङ्गुलायां भैरवो भीमलोचनः ॥

End :—

अज्ञात्वा भैरवं पीठं पीठशक्तीश्च शङ्कर ।
प्राणनाथ न सिध्येत कल्पकोटिशतैरपि ॥

न देयं परशिष्याय निन्दकाय दुरात्मने ।
शठाय क्रूरकर्म्माय दत्त्वा मृत्युमवाप्नुयात् ॥
दद्यात् शान्ताय शिष्याय मन्त्री मन्त्रार्थसिद्धये ॥

Colophon :—

इति तन्त्रचूडामणौ शिवपार्व्वतीसंवादे महापीठनिरूपणं समाप्तम् । ॐ तत्सत् ।

5957.

5303. *Mahāpīṭhanirūpaṇa from the Tantracūḍāmaṇi.*

Substance, Serampore paper. $17\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 2. Lines, 9 on a page. Extent in ślokas, 70. Character, Bengali. Appearance, fresh. Complete.

Same as above. The colophon of the present MS, apparently through the copyist's error, writes Candracūḍāmaṇi in place of Tantracūḍāmani.

5958.

3711. **तन्त्रचूडामणिसारः ।** *Tantracūḍāmaṇisāra.*

Substance, country-made paper. 18 × 4 inches. Folia, 12. Lines, [illegible] on a page. Extent in ślokas, 200. Character, Bengali. Appearance, worn and pasted. Incomplete.

This MS contains only one chapter dealing with details of Tāntric worship.

Beginning :—

शिवः शैवाश्च विप्रास्ते अपि सर्व्वत्र देशिकाः ॥
गणेशो गणपत्याश्च गणदीक्षाप्रभुर्मतः ॥
सूरः सौरास्तथा वत्स विष्णोर्विष्णुपरायणाः ।
दिव्यौघगुरवो देवि सिद्धौघगुरवस्तथा ॥

मानवौघाः समासेन कथयामि तवाग्रतः ।
सर्व्वतन्त्रेषु मन्त्रेषु प्रोक्ता मन्त्रचतुष्टयी ॥

Colophon :—

इति तन्त्रचूडामणिसारे भावचूडामणौ पटलः ।

5959.

676. ऊर्द्ध्वाम्नायसंहिता । *Ūrddhvāmnāyasaṃhitā.*

Substance, country-made paper. 13 × 5 inches. Folia, 15. Lines, 10 on a page. Extent in ślokas, 300. Character, Nāgara. Appearance, tolerable. Complete in twelve chapters.

This is a treatise on Vaiṣṇavite faith in the form of an interlocution between Nārada and Vyāsa.

For a description of the work see L. I. 243 and Oxf. 301b. The work has been printed in Bengali characters with Bengali translation by Abhayā Charaṇa Tarkanidhi (Calcutta, 1285 B.S.).

It is a very late work as Gaurāṅga or Caitanya, the great Vaiṣṇava reformer of Bengal, is here referred to as an Avatāra in place of the Buddha and it gives the *mantra* for his worship.

5960.

2821. *Ūrddhvāmnāyasaṃhitā.*

Substance, country-made paper. 16½ × 5½ inches. Folia, 4. Lines, 10 on a page. Extent in ślokas, 90. Character, Bengali. Appearance, fresh. Incomplete.

This MS contains the first three chapters and the beginning of the fourth.

5961.

4648. *Ūrddhvāmnāyasaṃhitā.*

Substance, country-made yellow paper. Folia, 8. Lines, 6 on a page. Extent in ślokas, 100. Character, Bengali. Appearance, fresh. Incomplete.

This MS contains the first four chapters of the work and a few lines of the fifth.

5962.

4608. ऊर्द्ध्वाम्नायतन्त्रम् । *Ūrddhvāmnāyatantra.*

Substance, country-made yellow paper. 16 × 3¾ inches. Folia, 16. Lines, 6 on a page. Extent in ślokas, 325. Character, modern Bengali. Appearance, fresh. Incomplete.

The present MS begins from the third chapter and reaches up to a portion of the sixth. It deals with the nature of the human body, of Brahman and of the greatness of the guru.

Beginning :—

देव्युवाच ।

शरीरं कीदृशं नाथ मुक्तिर्वा केन कर्म्मणा ।
इदानीं श्रोतुमिच्छामि ब्रूहि मे शशिशेखर ॥

ईश्वर उवाच ।

शृणु देवि प्रवक्ष्यामि शरीरं कर्म्मरूपिणम् ।
रजस्वला च या नारी विशुद्धा पञ्चमे दिने ॥
पीडिता कामबाणेन ततः पुरुषमीहते ।
भगलिङ्गसमायोगान्मैथुनं स्यात्तथा तयोः ॥
अन्योन्यस्पर्शनादेव जायते च महत् सुखम् ।
क्षरते च तथा रेतः प्राणापानविसंश्रिते ॥

क्षितिरापस्तथा तेजो वायुराकाशमेव च ।
सर्व्वेषां तत्र तनुः स्यात् देहस्थं रक्तबीजयोः ॥
नाभिरन्ध्रे तथा देवि भ्राम्यते च समीरणैः ।
कुम्भकारो यथा चक्रे घटते च घटादिकम् ॥
तथा समीरणो गर्भे घटते प्राणिनां तनु ।
कलनं चैकरात्रेण बुद्बुदं पञ्चमे दिने ॥
शोणितं दशरात्रेण मांसपिण्डं चतुर्द्दशे ।
मासैके चैव सम्पूर्णे मांसपिण्डोऽङ्कुरायते ॥
आदौ संजायते बीजो ब्रह्माण्डे सहसाङ्कुरः ।
तस्य मध्ये सुमेरुश्च कङ्कालदण्डरूपकः ॥
चराचराणां सर्व्वेषां देवादीनां विशेषतः ।
आलयः सर्व्वभूतानां मेरोरभ्यन्तरेऽपि च ॥
प्रदीपकलिकाकारो जीवो हृदि सदा स्थितः ।
रज्जुबद्धो यथा श्येनो गतोऽप्याकृष्यते पुनः ॥
गुणबद्धस्तथा जीवः प्राणापानेन कृष्यते ।
जीवस्य परमेशानि परिवारगणान् शृणु ॥

End :—

यावतः कुरुते जन्तुः सम्बन्धान् विषयप्रियान् ।
तावन्त्यस्य विशन्त्येते शरीरे शोकसङ्कराः ॥
स्वदेहमपि जीवोऽयं त्यक्त्वा याति महेश्वरि ।
स्त्रीमातृपितृपुत्रादिसम्बन्धः केन हेतुना ॥
दुःखमूलं हि संसारः स यस्यास्ति स दुःखितः ।
तस्य त्यागः + + + + +

5963.

3175. **काल्यूर्द्ध्वाम्नायतन्त्रम् ।** *Kālyūrddhvāmnāyatantra.*

Substance, Serampore paper. 13 × 4½ inches. Folia, 25. Lines, 10 on a page. Extent in ślokas, 540. Character, Bengali. Appearance, discoloured. Complete.

The present MS, as does also the one described in L. V. 1743, contains chapters I–V. The work is also described in CS. V. 22, where no reference is made to the number of chapters, and in VSP where the work is called *Ūrddhvāmnāyatantra.*

5964.

2896. **श्यामामोदतरङ्गिणी ।** *Śyāmāmodataraṅgiṇī.*

Substance, country-made yellow paper. 17 × 4 inches. Folia, 12. Lines, 5 on a page. Extent in ślokas, 210. Character, Bengali. Appearance, fresh. Complete.

The present MS contains 12 chapters. The work deals with the efficacy of the different mantras of Kālī (e.g. ककारमनु—2B, आकारमनु—3A, लकारमनु—3B, ईकारमनु—5A). It also lays down in brief the rules for her worship.

Beginning :—

श्रीपार्व्वत्युवाच ।

भगवन् सर्व्वतत्त्वज्ञ महाभूत परात्पर ।
नमामि नाथ देवेश भवन्तं जगदीश्वरम् ॥
त्वन्माया जगतीव्याप्ता यया संमोहिताः सुराः ।
त्वमेव जगतां कर्त्ता त्वमेव परमेश्वरः ॥
... ...

महाभूत उवाच ।

... ...
... ...
एकैव शून्यरूपास्ति तस्याः सृष्टिकृतीच्छया ।
काली भवति सा साक्षात् सा नित्याप्यभिधीयते ॥

तस्या रतीच्छया कालो जायते परमेश्वरि ।
तदिच्छया महातारा ततोऽपि त्रिपुरा परा ॥
ततः सर्व्वा महाविद्या भक्तचिन्तार्थकल्पिताः ।
कालीकालसमाख्यातब्रह्मविष्णुशिवादयः ॥
ब्रह्मेच्छया जगत् सर्व्वं विष्णोर्विचलपालने ।
शिवेच्छया जगद्ध्वंसो देवि निश्चितमीरितम् ॥
... ...
ककारः कालिका साक्षात् ककारः सर्व्वसिद्धिदः ।
कदाचित् केन रूपेण भ्रमविज्ञानतोऽपि वा ॥
यः स्मरेत् मोक्षमाप्नोति सत्यं मे निश्चिता मतिः ।

End :—

दिव्यभावमतं देवि कथितं चादियामले ।
तत्कृत्वा सिद्धिमायाति शिवरूपो भवेद्यदि ॥

Last Colophon :—

इति श्यामामोदतरङ्गिण्यां महाभूतप्रोक्तायां द्वादशः पटलः ॥

5965.

6077. शिवनृत्यतन्त्रम् । *Śivanṛtyatantra.*

Substance, Kashmere paper. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. Folia, 9. Lines, 12, 13 on a page. Extent in ślokas, 80. Character, Śāradā. Fol. 1–2A are written in modern Kashmeri. Appearance, new. Complete.

The work deals with different mystic diagrams of Tāntrik worship and the present MS contains nine chapters.

Beginning :—

श्रीगणेशाय नमः ।
ॐ श्रीदेव्यै सिद्धिदायिन्यै नमः ।

श्रीभैरव उवाच ।

ॐ महान्तत्यावसाने तु परिपप्रच्छ पार्व्वती ।
गिरिशं [f]शरसा नत्वा चन्द्रार्द्धकृतशेखरम् ॥

श्रीदेव्युवाच ।

देवदेव महादेव सृष्टिस्थित्यन्तकारक ।
पूर्व्वमुक्तानि यन्त्राणि कथयस्व कृपानिधे ॥

श्रीदक्षिणामूर्त्तिरुवाच ।

शृणुष्वावहिता + + गिरिजे प्राणवल्लभे ।
अकथ्यं परमार्थेन तथापि कथयाम्यहम् ॥

End :—

इदं गोप्यतरं तन्त्रं तवैवाग्रे प्रकाशितम् ।
किं बहूक्तेन देवेशि कलौ कल्पतरूपमम् ॥

Colophons of the different chapters :—

1B, इति दक्षिणामूर्त्तिपार्व्वतीसंवादे शिवन्त्ये नवकोष्ठो(?)विधि प्रथमः पटलः ; 2A, पञ्चविंशतिको द्वितीयः पटलः ; 3A, एकोनपञ्चाशं कोष्ठविधि स्तृतीयः पटलः ; 3B, एकाशीतियन्त्रं चतुर्थः पटलः ; 5A, पञ्चमः पटलः ; 5B, षष्ठः पटलः ; 6B, सप्तमः पटलः ; 7A, चतुःष + + विधिरष्टमः पटलः ; 9A, शतकोष्ठयन्त्रं नवकोष्ठयन्त्रं नवमः पटलः । समाप्तम् ।

Post Colophon Statement :—

सं २७ माघवति प्रतिपदि विद्वालकृपालुना स्वार्थे लिखितम् ।

The reverse of the last leaf and one entire leaf, not numbered, give various diagrams.

5966.

9557. शिवताण्डवम् । *Śivatāṇḍava.*

Substance, country-made paper. 12 × 5 inches. Folia, 17. Lines, 1 on a page. Extent in ślokas, 714. Character, Nāgara. Appearance, old. Complete.

The work appears to be divided in two parts, and the present MS comprises the latter part in 15 chapters.

Beginning :—

श्रीगणेशाय नमः ।

अजस्रमजनिष्यन्दलहरीललितालकैः ।
कवलीकृतविघ्नौघपुराणकरिणे नमः ॥

देव्युवाच ।

देवदेव महादेव जगन्नाथ जगत्पते ।
त्वत्प्रसादाच्छ्रुता नाथ विद्याभेदान्यनेकशः ॥
वद मे कृपया नाथ सद्यः प्रत्ययकारकं ।
प्राणान्तं मे करिष्यामि यदि नो कथ्यतेऽधुना ॥

ईश्वरोवाच ।

म+कार सहस्राणि वारितानि पुनः पुनः ।
स्त्रीस्वभावाच्च तरले किं पृच्छसि वदस्व तत् ॥

देव्युवाच ।

सूचितस्त्वं पुरा नाथ ताण्डवं न प्रकाशितं ।
नृत्योत्सुकेन रुद्रेण यथावृत्तं पुरा कृतम् ॥
ताण्डवान्तर्गतं कृत्यं षट्सु कर्म्मसु मे वद ।

ईश्वरोवाच ।

अप्रकाश्यमिदं देवि प्राणैः कण्ठगतैरपि ।
तव स्नेहात् प्रवक्ष्यामि नराणां वाञ्छितप्रदं ॥
किंवा कर्त्तुं शक्यते च ताण्डवेन विना नरः ।

End :—

न दारिद्र्यवशं यान्ति पुत्रपौत्रादिभिः सह ।
स(ह) देशः सिद्धक्षेत्रं स्यात् दशयोजनमायतं ।
यत्र तिष्ठति देवेशि लिखितं शिवताण्डवम् ।

Colophons of the different chapters :—

Fol. 2A, इति शिवताण्डवे देवीश्वरसंवादे प्रथमः पटलः ; 3A, ०द्वितीय पटलः ; 4A, ०तृतीयः पटलः ; 5B, ०चतुर्थः पटलः ; 6B, ०पञ्चमः पटलः ; 8B, ०षष्ठः पटलः ; 9A, ०सप्तमः पटलः ; 11A, ०अष्टमः पटलः ; 12A, ०महाविद्योपाख्यानं नाम पटलः ; 12B, ०दशमः पटलः ; 13A, ०एकादश पटलः ; 14A, ०द्वादशः पटलः ; 14B, ०त्रयोदशः पटलः ; 15B, ०चतुर्दश पटलः ; 17B, ०इति शिवताण्डवे पार्व्वतीश्वरसंवादे उत्तरखण्डे पञ्चदश पटलः । समाप्तोऽयं ग्रन्थः ।

Post Colophon Statement :—

हरिकृष्णचक्रवर्त्तिनः पुस्तकमिदं । शुभमस्तु ।

5967.

9556. *Śivatāṇḍava.*

Substance, country-made paper. 13 × 5½ inches. Folia, 21. Lines 8–16 in a page. Extent in ślokas, 900. Character, Nāgara. Appearance old. Incomplete.

This MS contains chapters 12, 13, and 14 of the first part. The second part is referred to by Nīlakaṇṭha in his commentary (No. 5968 ff) on XII. 5 of the work.

Beginning :—

परमभैरव उवाच ।

अथ देवेशि वक्ष्यामि परमाद्भुतकारणम् ।
यन्न कस्यचिदाख्यातं तत्ते वक्ष्यामि साम्प्रतम् ॥
शृणुष्वैकमनाः कान्ते मत्तमातङ्गगामिनि ।
नव्यवस्तुपरिज्ञानं पृथक् पृथक् यथा तथा ॥
वश्यार्थे भूर्ज्जपत्रे तु मोहने रौप्यपत्रके ।
मारणे लोहपत्रे तु स्तम्भने पैत्तलं मतम् ॥

विद्वेषे तु श्मशानस्य चीवरं समुदाहृतम् ।
आकर्षे सीसजं प्रोक्तं राज्यार्थे ब्रह्मवृक्षजम् ॥

End :—

+ + यन्त्रं यन्त्रराजाभिधं तुभ्यं मयोदितम् ।
गोपनीयं प्रयत्नेन स्वयोनिरिव पार्व्वति ॥

Colophons of the chapters :—

Fol. 4A, इति श्रीसर्व्वतन्त्रोत्तमोत्तमे पार्व्वतीश्वरसंवादे लेख्यकथनं नाम द्वादशः पटलः; 11A, इति श्रीसर्व्वतन्त्रोत्तमोत्तमे दक्षिणामूर्त्ति-पार्व्वती-संवादे नगेन्द्रप्रयागे शिवताण्डवमहातन्त्रे नवकोष्ठकात्मकयन्त्रकथनं नाम त्रयोदशः पटलः; 21A, इति श्रीदक्षिणामूर्त्तिपरमभैरवसंवादे सर्व्वतन्त्रोत्तमोत्तमे नगेन्द्र-प्रयागे शिवताण्डवषोडशकोष्ठलिखनप्रकारकथनं नाम चतुर्द्दशः पटलः समाप्तः ।

5968.

3323. *Śivatāṇḍavatantra.*

Substance, country-made paper. 14 × 5½ inches. Folia, 57. In tripāṭha form. Character, Nāgara. Date, Saṃvat 1897. Appearance, fresh. Incomplete.

The present MS is accompanied by Nīlakaṇṭha's commentary and contains chapters XII–XIV of the first part. The commentary is described in HPR. I. 360. In the beginning of the commentary the author refers to several other works by himself, e.g. the commentaries on *Mantra-bhāgavata*, *Mantrarāmāyaṇa*, and *Mantramahābhārata*. The authoritativeness of the Tantras as also of the mantras, both in Sanskrit and the vernaculars, is discussed and it is argued that the Tantras form part of the Purāṇas.

The genealogy and the achievements of the family of the royal patron of the commentator are given thus (Fol. 1B) :—

यन्नाथं प्राप्य नाकं हसति मरुमही जङ्गलं नन्दनत्वम्
प्राप स्वः सप्तकश्रीपदमचलमभूत् पूर्व्विकानेरनाम्नी ।

शूरः श्रीमान् वदान्यः शमदमसहितो नीतिशिक्षागुरूणाम्
आद्यः सोऽद्यापि कीर्त्या जगति विजयते रायकल्याणमल्लः ॥
समजनि विक्रमनगरे राजा श्रीरायसिंहाख्यः ।
यस्मिन् ददति गजौघान् गजपतिभावं गतोऽविपालोऽपि ॥
दीपादिव प्रदीपस्तस्माच्छ्रीशूरसिंहोऽभूत् ।
मारवधूर्वोढारं यं लब्धात्मानम् उदूढं मेने ॥
वदान्यानां मूर्द्धि स्फुरतु लभतां शूरसुततां
कुरूणामीशानानवतु ककुभो वा विजयतां ।
परप्रीतश्रीको विजयविजितो भूविधुरितः
कथं वा राधेयः कलयतु महाकर्णसमताम् ॥
श्रीमाननूपपूर्णेन्दुः कर्णक्षीरार्णवोद्भवः ।
यत्कीर्त्तिकौमुदी भाति विश्वसन्तापनुत्तये ॥
लोह-दारु-दृषदामिवोदराद्वच्चसारशिवताण्डवादिह ।
केन वोपकरणेन कः पुमान् यन्त्रवित्तमुपनीय दर्शयेत् ॥
जयत्यनूपभूपोऽसौ यदाज्ञाबलयोगतः ।
भिन्दन्त्यभेद्यमप्यर्थं शौर्य्यपाण्डित्यशालिनः ॥
श्रीमत् स्फूर्ज्जदनूपभूपतिमहाक्षेत्रे निसर्गोज्ज्वले
श्रीमत्सद्गुरुवाक्यबीजनिचयानुप्ता समुत्पादितः ।
श्रीमच्चौधरिनीलकण्ठवशिना वर्षं विना भूयसे
भूयात् दिव्यफलाय यन्त्रलतिकारामोपमोत्यद्भुतः ॥

The name of the commentary is thus indicated (Fol. 2A) :—

शिवताण्डवटीकेयमनूपारामसंज्ञिता ।
यन्त्रकल्पद्रुममयी द[द्या]द्वोऽभीष्टसन्ततिम् ॥

The beginning of the text is found in Fol. 8A, the first seven leaves being taken up with the commentator's introduction (*upodghāta*).

The Last Colophon :—

इति श्रीमत्समस्तसामन्तचूडामणि-मरीचिमञ्जरीसमर्चित-पादपीठोपान्तभूमिना श्रीमहाराजाधिराज-कर्णमहाशय-सूनुना श्रीमदनूपसिंहेन प्रेरितपदवाक्यप्रमाणमर्य्यादाधुरन्धर-चतुर्धरवंशावतंस-गोविन्दसूरिसूनोर्नीलकण्ठस्य कृतौ श्रीशिवताण्डवीय अङ्कयन्त्रव्याख्याने अनूपारामसंज्ञे षोडशकोष्ठलेखनप्रकारकथनं नाम चतुर्दशः पटलः समाप्तः । समाप्तेयं टीका ।

Post Colophon Statement :—

संवत् १८९७ ॥ माघशुक्ल १३ ॥ श्रीगुरवे नमः ॥ श्रीकृष्णाय नमो नमः ॥

5969.

5566. *Śivatāṇḍavatantra.*

Substance, country-made paper. 11 × 5 inches. Folia, 58. In tripāṭha form. Character, Nāgara. Date, Saṃvat 1917. Appearance, fresh. Incomplete.

This MS also contains chapters XII–XIV inclusive of the first part of the work. The text is accompanied by the commentary of Nīlakaṇṭha.

Post Colophon Statement :—

संवत् १९१७ भाद्र शुक्लतिथौ विद्याधरद्विवेदिना लिखितम् ।

5970.

9477. *Śivatāṇḍavatantra.*

Substance, country-made paper. 10 × 4 inches. Folia, 9. Lines, 12 on a page. Extent in ślokas, 214. Character, Nāgara. Appearance, fresh. Fragmentary.

It contains 27 verses and a portion of the 28th of Chapter XII of the work and is accompanied by the commentary of Nīlakaṇṭha.

5971.

5720A. *Śivatāṇḍavatantra.*

Substance, country-made paper. $9\frac{3}{4} \times 4\frac{1}{2}$ inches. Folia, 1–127. Lines, 11 on a page. Character, Nāgara. Appearance, discoloured. Incomplete at the end.

The MS contains Chapter XII and 45 verses of Chapter XIII. It is accompanied by the commentary Mallādarśa by Ghanaśyāma. The commentary is full of polemic discussions and deals with the work proper from Fol. 29A, the previous portion being devoted to preliminary discussions.

Beginning :—

श्रीराजराजेश्वराय नमः ।

स्वभक्तत्वाभावेऽप्यपरसुरभक्तत्वविरहात्

स्वपाल्यत्वं मत्वा रुचिरतरकामाननुजनं ।

प्रयच्छन्तं + + + + वसतीन् सत्वरतरं

माहिष्मत्याः कमपि भज चेतः प्रतिदिनम् ॥

कौवेर्य्यां दिशि ताकमेत्यभिधया ख्यातोऽस्ति कश्चिद् गिरिः

गण्डक्याः सविधे हि तत्र नृपतिः श्रीसाहमल्लोऽभवत् ।

यं प्राप्यामृतभानुभानुबलभित्कन्दर्पकल्पद्रुता

संदेहं बहुवेदिनोपि मनुजा आकल्पमापेदिरे ॥

तस्माज्जातः श्रीघनश्याममल्लः सन्तं तातं राज्यलक्ष्मीर्विहाय ।

यत्तं भेजे सूचितं तद्धि कोन्यो लक्ष्मीनाथः श्रीघनश्यामदेवात् ॥

तदीयः सुतः श्रीमल्लैवम्मनामा

नृपालः स्ववंशावतंसीभवं तः (?) ।

वरेण्यं यमाहुर्हि सन्तोऽयमीशो

जयत्यर्थिसार्थार्थितायुष्यवृद्धिः ॥

सत्यास्तन्त्रगिरो भवन्ति तदनुध्यानेन तत्स्था गुणाः
धातर्य्येवमसौ नृपो भगवतः श्रीरामचन्द्रस्य यत् ।
ध्यानादेककलत्रतासुरवरावासोल्लसत्सेतुता-
शम्भुस्थापकतादिकानिह गुणानासादयत्युत्तमान् ॥
अमुष्यैवानल्पा भवति करुणा लोकनिवहे
सतां दत्त्वा द्रव्यप्रभृति बहुदुःखं शमयतः ।
समुद्भाव्यर्थौघोद्भवदमितदुःखव्ययकृते
दुरूहां यन्त्रालीं प्रकटयितुमाज्ञां रचयतः ॥
यन्त्रावलीं रचयतः शिवतोऽपि चासौ
भूपान् कृपालुरिह तां प्रकटीकरिष्यन् ।
दुर्ब्बोधसारकलिता न हि खेष्टसिद्ध्यै
चित्रं न तत्र हरिरेष नृपालवेषः ॥
नृपालेनादिष्टो दिनकरगुरूच्छिष्टभजनः
प्रभोर्माहिम्नत्याश्चरणनखशीतांशुकिरणैः ।
गतायाताज्ञानव्रजतिमिरशब्दार्थरचनः
कथं वा नो कुर्य्यादयमपि जनो ग्रन्थममलम् ॥
शिवताण्डवयन्त्राणां ग्रन्थार्थादर्शतां गतः ।
मल्लादर्शो मम ग्रन्थः स रञ्जयतु पण्डितान् ॥
शिवताण्डवटीकेयं स्वल्पाल्पापि सुधीराणां ।
व्याख्येयार्थगुणौघैः सर्व्वार्थाकर्षिणी भवति ॥

अथ जगदेव स्वस्वपूर्व्वपूर्व्वजन्मसञ्चितदुरदृष्टसामर्थ्यनियमितदारिद्र्यादिनाना-विधदुःखपङ्कनिमग्नमुद्दिधीर्षुः परमकारुणिको भगवान् सदाशिवः संहितोड्डामर-यामलादिनानातन्त्रेषु रुद्रदीपमहादीपजपहोमपु + + + दिरूपं अमितमुपायमुदा-जहार । तस्य चासमर्थानधिकारादिना न सर्व्वविषयत्वं भवतीत्यपरितुष्टो अल्प-क्लेशतो धारणमात्रादेव समीहितपरम्परामव्यभिचारादुल्लासयन्तीमङ्कयंत्रावलि-माविर्भावयितुं नेदमजिज्ञासवे नापि स्वप्रियभावमदधते नापि स्वाभक्तायोपदेश्यमिति सूचयितुं शिवताण्डवाख्ये तंत्रे विशेष्ये देवीशरीरं प्रश्नत्वेन स्वीकृत्य तदुत्तरकथनव्याजेन पूर्व्वं वक्ष्यमाणयन्त्रोपयोगिपदार्थसार्थमाह दक्षिणामूर्त्तिरुवाचेत्यादिना ।

5A, नन्वेवं तन्त्रोक्तवेदविरुद्धमार्गस्यापि प्रामाण्यं प्रसज्येतेति चेत् प्रसज्यतां, का नो हानिः। "अथ मदिरां पिबेत्" "प्रपश्येन्मदनावासं परस्त्रीणां विशेषतः" "कोटिभगदर्शनान्मुक्ति" रित्यादितान्त्रिकार्थानुष्ठानार्थं शिष्टानामपि प्रवृत्त्यापत्तिरिति चेत् सत्यं। "श्येनेनाभिचरन् यजेत" इत्यादि वेदविहित श्येनादियागे न कुतस्तेषां प्रवृत्तिः। अथ वेदविहितत्वमात्रं न शिष्टकर्त्तृकानुष्ठान विषयत्वे तन्त्रं किन्तु वेदाप्रतिषिद्धत्वविशिष्टं तत्। भवति हीदं विहितमपि न हिंस्यात् सर्व्वा भूतानि इत्यादिविधिना प्रतिषिद्धमिति चेत्। एवं तर्हि "ब्राह्मणो मदिरां पीत्वा ब्राह्मण्यादेव हीयते" इत्यादितान्त्रिकस्मार्त्तादिवचनैस्तस्य प्रतिषिद्धतया कथं तत्र ते प्रवर्त्तेरन्। अथ पानादिप्रशंसावचनानां का गतिरिति चेत् या गतिः श्येनादियागवचनानाम्। अथ प्ररोचनाभिः तत्तदधिकारिणां तत्र तत्र प्रवर्त्तनेन तत्तत्काम्यार्थाधिगमन एव तेषां तात्पर्य्यं न तु परमपुरुषार्थ प्रत्यूहपापापूर्व्वपरिहारेपीति चेत् इहापि निधीयतां सैव दृष्टिः। किं च निषेधवचनानां त्वन्मते विगतिरेव न हि तेषां निन्दाकरणेन ततो निवृत्तिः परं ततो निवृत्तेस्तवानभिप्रेतत्वात्। अथ तत्तदैहिककाम्यफलसाधनार्थमेव तत्र प्रवृत्तिरिष्यते। तत्र कामनानुरागात् प्रवृत्तस्य पारलौकिकमनिष्टं नरकादिरूपं भविष्यतीति चेत् एवं तर्हि सिद्धं नः समीहितम्। न ह्येतावतापि ब्राह्मणादि निषिद्धार्थबोधकभावस्याप्रामाण्यं श्येनादेरनुष्ठानेऽपि न हि तद्भागस्याप्रामाण्यं कश्चिदप्याचष्टे। ... ...

The conclusion drawn is :—

6B, मन्मते तु वेदाविरुद्धभागस्य प्रामाणिकतया तद्व्यावृत्त्यर्थं विशेषणमावश्यकमिति संक्षेपः। अत्र नीलकण्ठाः। ... ... इत्यादि श्रुतिमूलकत्वमेव षट्त्रिंशदाद्यंकयन्त्राणाम्। अयं ह्येतस्याः श्रुतेरर्थः।

Colophon :—

79A, इति सर्व्वतन्त्रोत्तमे दक्षिणामूर्त्तिपार्व्वतीसम्वादे पूर्व्वखण्डे द्वादशपटलः सम्पूर्णः।

5972.

5621A. मुण्डमालातन्त्रम् । *Muṇḍamālātantra.*

Substance, palm-leaf. 14 × 1½ inches. Folia, 27. Lines, 4-5 on a page. Extent in ślokas, 550. Character, Uḍiya. Appearance, good. Complete.

The present MS runs up to the end of the 15th chapter. L. I. 469, II. 740 have only six chapters each. VSP (p. 44) notices a MS of the work in 11 chapters.

The beginning of the work does not agree with that of L. I. 469 and L. II. 740, the first few lines of the last of which agree with those of the *Kālyūrddhvāmnāyatantra* (No. 5963 above). The work deals with Śakti worship in general and the worship of the ten *Mahāvidyās* in particular.

Beginnings of the different chapters :—

श्रीष्टदेवतायै नमः ।

मेरुपृष्ठे समासीनं देवदेवं जगद्गुरुम् ।
शङ्करं परिपप्रच्छ पार्व्वती परमेश्वरम् ॥

श्रीपार्व्वत्युवाच ।

सर्व्वानन्दमयीं नत्वा सर्व्वाम्नायनमस्कृताम् ।
सर्व्वसिद्धिप्रदां देवीं नमामि परमेश्वरीम् ॥
प्रसीद गुह्यवक्त्रान्ते कथयस्व प्रियम्वद ।
सर्व्वतन्त्रेषु मन्त्रेषु गुह्यं मत् पञ्चवक्त्रकम् ॥
तत्प्रकाशय गुह्याख्यं यद्यहं तव वल्लभा ।

श्रीशिव उवाच ।

कथान्ते कथयिष्यामि गुह्यं मत्पञ्चमात्मकम् ।
स्त्रीस्वभावान्महाभागे न जानामि सुखप्रदम् ॥

देव्युवाच ।

स्वस्थिग्रहं भविष्यामि न वक्तव्यं कदाचन ।
तव वक्त्रा भविष्यन्ति भावनामन्त्रसिद्धयः ॥

श्रीशिव उवाच ।

देवतागुरुमन्त्राणां भावनामेवमुच्यते ।
मन्त्रो यो गुरुरेवासौ यो गुरुः सा च देवता ॥
काली तारा महाविद्या षोडशी भुवनेश्वरी ।
भैरवी छिन्नमस्ता च रमा धूमावती परा ॥
वगला सिद्धविद्या च मातङ्गी कमलात्मिका ।
एता दश महाविद्याः सर्व्वतन्त्रेषु कीर्त्तिताः ॥
अयन्तु दुर्ल्लभो लोके षडाम्नायनमस्कृतः ।
एताभ्यः परमा भक्त्या त्रिषु लोकेषु दुर्ल्लभा ॥
सुखमोक्षप्रदा नित्या क्लेशसाधन कुत्रचित् ।
येन येन प्रकारेण सिद्धिं यास्यति भूतले ।
सर्व्वान्ते कथयिष्यामि प्रेमभावेन केवलम् ॥
नात्र सिद्धाद्यपेक्षादि न च रुक्षविचारणा ।
कालादिशोधनं नास्ति न च मित्रारिदूषणम् ॥
सिद्धिं विद्या महाविद्या युगसेवापरिश्रमः ।
नात्र कश्चिन्महादेवि दुःखसाध्यं न किञ्चन ॥
या काली परमा विद्या सा तारा परिकीर्त्तिता ।
या तारा परमा विद्या सैव काली प्रकीर्त्तिता ॥
एतयोर्भिन्नभावेन मन्त्राः सिद्धा भवन्ति न ।
उक्तन्तु कालिकातन्त्रे ताराकल्पे च तन्मया ॥
षोडशी वा महाविद्या चतुर्था कथिता पुरा ।
लक्ष्मीबीजादिभावेन पञ्चमी सा भवेदिह ॥
एकाक्षरीबीजहीना महाविद्या भवेत् पुरा ।
भुवने त्र्यक्षरी पातु महाविद्या प्रकीर्त्तिता ॥

देव्युवाच ।

त्वया विद्या च देवेश कथिता न प्रकाशिता ।
इदानीं कथयिष्यामि कथयानन्दसुन्दर ॥

ईश्वर उवाच ।

भुवनेशा महाविद्या देवराजेन वै पुरा ।
आराधिता च विद्येयं ब्रह्मणानेन मोहिता ॥
एकाक्षरी बीजहीना वाग्भवेनोज्ज्वला परा ।
कामराजाख्यविद्या सा सुसिद्धा पुष्पधन्विका ॥
शक्रेण पूजिता पूर्व्वं भुवनेशी प्रतिष्ठिता ।
कुमारी या च नार्य्येयं त्वया गुप्ता रतिच्युता ॥
केवलं शिवभावेन शक्तिरूपेण केवलम् ।
माया प्रतिष्ठिता देवी ताराचन्द्रस्वरूपिणी ॥
भैरवी तु महाविद्या महासम्पत्करी शुभा ।
छिन्नमस्ता सुरामांसप्रिया रक्तस्वरूपिणी ॥
धूमावती महाविद्या मारणोच्चाटने मता ।
वगला वश्यस्तम्भादि नानागुणसमन्विता ॥
मातङ्गी तु महाविद्या त्रैलोक्यवशकारिणी ।
कमला त्रिविधा प्रोक्ता एकाक्षरतया स्थिता ॥
एकाक्षरी महाविद्या सर्व्वसम्पत्प्रदायिनी ।

Chapter II (Fol. 2A) :—

श्रीदेव्युवाच ।

अक्षमालेति कथिता यत्नेनैव प्रकाशिता ।
अक्षमालेति किं नाम फलं किं वा वदस्व मे ॥
अक्षमाला तु देवेशि काम्ये नैमित्तिके तथा ।
भवत्यत्रापि पुण्येऽपि विस्तरात् कथ्यते मया ॥

Chapter III (Fol. 4A) :—

देव्युवाच ।

स्थानासनं देवदेव कथयानन्दहेतवे ।
मदाश्रया विनिर्द्दिष्टाः सर्व्वे मन्त्राः सुसिद्धिदाः ॥

ईश्वर उवाच ।

नदीतीरे विल्वमूले श्मशाने शून्यवेश्मनि ।
Substance, country-made paper. 16 × 6 inches. Folia, 7. Lines, 10 on a page. Extent in ślokas, 300. Character, Bengali. Appearance, discoloured. Complete in nine chapters.

Same as above.

6014.

3453. *Kumārītantram.*

Substance, country-made paper. 14½ × 3¾ inches. Folia, 12. Lines, 6 on a page. Extent in ślokas, 225. Character, Bengali. Appearance, discoloured. Complete in nine chapters.

Same as above.

6015.

5882B. कुलप्रकाशतन्त्रम् । *Kulaprakāśatantram.*

Substance, country-made paper. 8¾ × 6 inches. Folia, 3. Lines, 9 on a page. Extent in ślokas, 36. Character, modern Nāgara. Appearance, fresh. Incomplete.

The MS contains only an extract from the *Kulaprakāśa Tantra* and describes the śrāddha ceremony of a Kaula. A *paddhati* for the *śrāddha* is also appended.

Beginning :—

श्रीगणेशाम्बागुरुभ्यो नमः ।

कुलप्रकाशतन्त्रे ।

कुलश्राद्धं प्रवक्ष्यामि कौलधर्म्मोत्तमोत्तमम् ।
उपासकानां शुद्धानां शिवसान्निध्यकारकम् ॥
भूताष्टम्योः पूर्णिमायां वासरे शुक्रभौमयोः ।
+ + + तिथौ वापि पुष्ये पैत्र्ये कुहूदिने ॥
आमन्त्र्य ब्राह्मणान् शुद्धान् कुलाचारादितत्परान् ।
ब्रह्मनिष्ठान् यतीन् शान्तान् दीक्षितान् गुरुतत्परान् ॥
स्नातः स्नातान् समाहूय कौलश्राद्धं समाचरेत् ॥

Colophon :—

इति कुलपार्व्वणश्राद्धम् ।

6016.

4671. कालीकुलामृततन्त्रम् । *Kālīkulāmṛtatantram.*

Substance, country-made paper. 17½ × 6 inches. Folia, 26. Lines, 11 on a page. Extent in ślokas, 1,150. Character, Bengali. Date, Śaka 1727. Appearance, discoloured. Complete in fifteen Paṭalas.

The work deals principally with the worship of Kāli and with the worship of Tārā in a general way.

Beginning :—

ॐ नमो भवान्यै ।

कैलासशिखरे रम्ये नानासुखसमाकुले ।
सर्व्वर्त्तुकुसुमाकीर्णे नानापक्षिसुनादिते ॥
... ...
... ...

कालीकुलाम्नतं तन्त्रं प्रसङ्गात् कथितं प्रभो ।
विस्तारेण महाभाग कथ्यतां यदि मे कृपा ॥
विद्याराज्ञाश्च उद्धारं वर्णवर्णान् यथायुतान् ।
ऋषिच्छन्दो देवताश्च बीजं शक्तिश्च कीलकम् ॥
विनियोगं यदर्थश्च ध्यानपूजादिकं क्रमात् ।
स्तोत्रञ्च कवचञ्चास्याः साधनञ्च यथाक्रमम् ॥
कथयस्व महाभाग यद्यहं तव वल्लभा ।

श्रीभैरव उवाच ।

शृणु पार्व्वति वक्ष्यामि भैरवि प्राणवल्लभे ।
अतिगोप्या महापुण्या सारात्सारतरा परा ॥

End :—

अन्यतन्त्रेषु कापट्यं मम सर्व्वत्र वर्त्तते ।
नात्र किञ्चिन्महादेवि तथ्यमेतद्ब्रवीमि ते ॥
सत्यं सत्यं पुनः सत्यं सिद्धिरत्रैव कीर्त्तिता ।
इति ते कथितं सर्व्वं नान्यद्वक्तव्यमस्ति ते ॥

Last Colophon :—

इति श्रीकालीकुलाम्नततन्त्रे पञ्चदशपटलः समाप्तः ।

Post Colophon Statement :—

शुभमस्तु शकनरपतेरतीताब्दाः १७२७ । ३ ॥

6017.

10610. आनन्दार्णवतन्त्रम् । *Ānandārṇavatantram.*

Substance, country-made paper. 11 × 5 inches. Folia, 12. Lines, 16 on a page. Extent in ślokas, 480. Character, Nāgara. Appearance, old and discoloured. Complete in 10 Paṭalas.

The work deals with the worship of Śrīvidyā. It has no connection with the *Ānandatantra* (IO. IV. 2541.)

Beginnings of the different Paṭalas :—

Paṭala I :—

श्रीगुरु ऐक्यानन्दपादुकां पूजयामि नमः ॥
श्रीमत्कैलासशैलाग्रे कल्पवृक्षमहीतले ।
प्राह रत्नासनासीनं सर्व्वज्ञं सर्व्वमङ्गलम् ॥

सर्व्वमङ्गल उवाच ।

श्रुतं विधानं विद्यायाः साङ्गोपाङ्गसविस्तरम् ।
स्वतन्त्रैरन्यतन्त्रैश्च यथा यथा निरूपणम् ॥
अनन्वयैरन्यरूपैरन्योन्य[ा]दिमतक्रमैः ।
असंप्राप्यैकरूपत्वात् सन्देहो जायते मम ॥
अप्यपरेषु तन्त्रेषु यत् पुरोक्तं शिव त्वया ।
तथा चरितुमत्यन्तमशक्यं योगिनामपि ॥
प्रतितन्त्रे विशेषोऽस्ति तत्तदाकलनं यदि ।
तद्विधावक्तुमः साक्षात् सर्व्वज्ञोप्यतिविस्तरात् ॥
तस्मात्तत् श्रोतुमिच्छामि साङ्गोपाङ्गानुशासनम् ।
सारं समस्ततन्त्राणां प्रशस्तं नातिविस्तरम् ॥
शुष्कत्वात्वघमच्छाध्यमार्द्रत्वादपथं तदा ।
पथद्वयचरं मार्गं मंगलावहमुत्तमम् ॥
सर्व्वसिद्धिकरं सर्व्वपुरुषार्थैकसाधनम् ।
विधानं सर्व्वविद्यानां बोधनं पापनाशनम् ॥
विद्यास्वरूपमुद्धारचक्रजन्माक्षरक्रमम् ।
तयोरैक्यानुसन्धानमशमद्वैतकं वद ॥

श्रीसर्व्वज्ञ उवाच ।

शृणु देवि प्रवक्ष्यामि तव प्रश्नानुरूपकम् ।
नारायणाय कल्पादौ श्रिया संसूचितं क्रमम् ॥
रूपं त्रिपुरसुन्दर्य्या विद्याया हृदयं परम् ।
चक्रराजमदः साक्षाद्विधानं विश्वदुर्लभम् ॥

सद्गुरुदाचरणेनैव लभते विधिनामुना ।
बहुकालतपोलभ्यं कालं प्रोक्तं प्रकल्पितम् ॥
अयं मेरुरिति ख्याते विधिर्बाह्यान्तरात्मके ।
अनेन विधिनाराध्य हरिर्विश्वेशतां ययौ ॥
आनन्दार्णवनामापि तन्त्रं कल्याणसंज्ञितम् ।
संकल्पसिद्धिदं देवि पुरुषार्थैकसाधनम् ॥
वक्ष्याम्यपारं संक्षिप्य तन्त्रं श्रुतिमयोक्तिभिः ।
शृणु सुन्दरि सूक्ष्मधिया निर्द्वार्थं सादरम् ॥
बाला ब्रह्मात्मिका विद्या कुमारी वैष्णवी परा ।
युवती शाम्भवी देवी रजःसत्त्वतमोगुणैः ॥
वाग्भवानुगता बाला कुमारी मन्मथात्मिका ।
युवती शाक्तजा देवि वह्न्यर्केन्दुमहोदयात् ॥
तस्मान्नारायणी विद्या सात्त्विका मन्मथात्मिका ।
सूर्य्यतेजोमयी देवी कुमारी विश्वपालिनी ॥

Paṭala II (*Fol.* 1*B*) :—

चक्रजन्मक्रमं वक्ष्ये देवेश्युद्धारपूर्व्वकम् ।
यस्य विज्ञानमात्रेण पूजाफलमवाप्नुयात् ॥
विन्दुत्रिकोणाष्टकोणं द्विदशारमनुच्छदम् ।
वसुराजास्रभूविम्बत्रयं श्रीचक्रमीरितम् ॥

Paṭala III (*Fol.* 2*B*) :—

शृणु देवि प्रवक्ष्यामि दीक्षाकरणसञ्चयम् ।
अन्तमेरुक्रमन्यासानेकोक्त्या तात्मसाधयेत् ॥
विद्याखण्डत्रयोपेतां त्रिपीठास्त्रिदलान्तरे ।
कामरूपकजालंध्र-पूर्णभूपूरसंज्ञकान् ॥

Paṭala IV (*Fol.* 3*B*) :—

अथ चक्राणि चक्रेभ्यो विद्याश्चैव विभूतयः ।
शृणु देवि पुराप्रोक्तमेरुणा चोदितं क्रमात् ॥

भूबीजात् त्र्यक्षरा जाता श्रीकण्ठा गुणशक्तिकाः ।
वाक्काम-शक्त्यादिगुणा दशाष्टदशरूपिणः ॥

Paṭala V (*Fol. 4B*) :—

अथ वक्ष्यामि देवेशि नवयोन्यंकि[तं] परम् ।
त्रयश्चत्वारिंशदस्त्रचक्रं पञ्चस्वरूपकम् ॥

Paṭala VI (*Fol. 5B*) :—

अथ वक्ष्यामि देवेशि दीक्षितो गुरुणा सता ।
प्रातरुत्थाय शिरसि यजेत् श्रीगुरुपादुकाम् ॥

Paṭala VII (*Fol. 7B*) :—

शृणु देवि प्रवक्ष्यामि विद्यायाः साधनं परम् ।
मङ्गलाचारसम्पन्नो जपेद्विद्या त्रिलक्षगाम् ॥

Paṭala VIII (*Fol. 8B*) :—

अथ वक्ष्यामि वाक्सिद्धिप्रमुखाखिलकल्पयन् ।
शुक्लां वा लोहितां देवीं पुस्तकाक्षस्रगुज्ज्वलाम् ॥
वराभयकरां ध्यायेद्विद्यां वाचा जपेत् प्रिये ।
वेष्टयेदपि तच्चक्रं देवि तद्विद्यया सह ॥

Paṭala IX (*Fol. 9A*) :—

अथ वक्ष्यामि देवेशि मालामन्त्रं द्विधा मतम् ।
वर्णमाला रश्मिमाला सद्यः फलकरं नृणाम् ॥

Paṭala X (*Fol. 10B*) :—

वक्ष्ये शेषरहस्याख्यमशेषक्रमदायिका ।
शक्तिं कल्याणविद्यायाश्चक्रमन्त्रस्त्रशक्तिगाम् ॥

Last Colophon :—

इति श्रीमद् आनन्दार्णवतन्त्रे कल्याणचतुःशतीसंहितायां रहस्य-
कथनं नाम दशमः पटलः ।

In the colophons of the sixth and the last Paṭala the work is also called चतुःशती संहिता ।

6018.

169. ज्ञानतन्त्रम् । *Jñānatantram.*

Substance, country-made yellow paper. 18 × 3½ inches. Folia, 8. Lines, 6–7 on a page. Extent in ślokas, 83. Character, Bengali. Appearance, old. Complete in nine chapters.

The present manuscript has been described in L. I. 444.

This MS has nine chapters. A tenth chapter is found in HPR. I. 124. It is in the form of an interlocution between Śiva and Nārada.

6019.

1851. योगिनीतन्त्रम् । *Yoginītantram.*

Substance, country-made yellow paper. 19 × 4 inches. Folia, 47. Lines, 7–8 on a page. Extent in ślokas, 1,475. Character, Bengali. Appearance, fresh. Incomplete.

The present MS contains the first part in 19 Paṭalas. The entire work, in two parts, has been described in IO. IV. 2555 and published in the *Vividhatantrasaṃgraha* as also by J. Vidyāsāgara (Calcutta, 1897), Khemraj Krishnadas (Bombay, V.S. 1960), and Narayan Vandyopādhyāya (Calcutta, 1294 B.S.). The title page of the last of these editions attributes the work to Śaṅkarācārya Kāpālika.

6020.

4604. *Yoginītantram.*

Substance, country-made paper. 16½ × 3½ inches. Folia, 66. Lines, 6 on a page. Extent in ślokas, 1,475. Character, Bengali. Appearance, fresh. Incomplete.

This MS also contains only the first part in 19 chapters.

6021.

5173. *Yoginītantram.*

Substance, country-made paper. 14½ × 4½ inches. Folia, 21. Lines, 9 on a page. Extent in ślokas, 475. Character, Bengali. Appearance, discoloured. Incomplete.

This MS runs from the beginning up to a portion of chapter VIII of the first part.

6022.

3388. लिङ्गार्चनतन्त्रम् । *Liṅgārcanatantram.*

Substance, country-made paper. 16 × 5 inches. Folia, 21. Lines, 9 on a page. Extent in ślokas, 900. Character, Bengali. Appearance, fresh. Complete in 18 chapters.

The work has been described in CS. V. 83 and L. I. 288. It is a Śaiva work dealing with the worship of the phallic emblem of Śiva and allied matters.

6023.

4599. *Liṅgārcanatantram.*

Substance, country-made paper. 17 × 3¼ inches. Folia, 10. Lines, 10 on a page. Extent in ślokas, 400. Character, Bengali. Date, Śaka 1691. Appearance, discoloured. Complete.

This MS is almost of the nature of a *paddhati* containing extracts from the Tantra. Colophons of only the first and last chapters are found here.

Post Colophon :—

श्रीपरदेवतायै नमः ॥

श्रीकालीशङ्करदेवशर्म्मणा श्रीरामकिङ्कर-देवशर्म्मणः पुस्तकमिदम् ।

शकाब्दा १६९१ मेदिनीपुरस्य श्री.....

The name is blurred over with ink.

6024.

4673. *Liṅgārcanatantram.*

Substance, country-made paper. 17 × 5½ inches. Folia, 18. Lines, 12 on a page. Extent in ślokas, 802. Character, Bengali. Appearance, discoloured. Complete in 18 chapters.

Post Colophon :—

श्रीयुक्तलाला रामगतिराय-महाशयस्य पुस्तकमेतत् श्रीहरचन्द्र-सेनस्य स्वाक्षरञ्च । ॐ नमो गुरवे ।

6025.

4699. *Liṅgārcanatantram.*

Substance, country-made paper. 17½ × 6 inches. Folia, 15. Lines, 14 on a page. Extent in ślokas, 882. Character, Bengali. Appearance, discoloured. Incomplete.

This MS runs from the beginning up to a portion of chapter XVIII.

6026.

1620. कामाख्यातन्त्रम् । *Kāmākhyātantram.*

Substance, country-made yellow paper. 13½ × 3 inches. Folia, 25. Lines, 6 on a page. Extent in ślokas, 450. Character, Bengali. Appearance, old. Complete in 9 chapters.

The work has been described in L. III. 1067 and published in the *Vividhatantrasaṃgraha.*

6027.

3166. *Kāmākhyātantram.*

Substance, European foolscap paper. 14½ × 3 inches. Folia, 28. Lines, 5 on a page. Extent in ślokas, 402. Character, Bengali. Written in red ink. Appearance, discoloured. Complete in nine chapters.

The last verse of the MS described in L. III. 1067 and of the printed edition is not found in the present MS.

6028.

5965. **करङ्किणीमततन्त्रे यक्षिणीकल्पः ।** *Yakṣiṇīkalpa from the Karaṅkiṇīmatatantram.*

Substance, Kāshmīrī paper. $10\frac{1}{2} \times 6\frac{1}{4}$ inches. Folia, 6. Lines, 11 on a page. Extent in ślokas, 100. Character, modern Kāshmīrī. Appearance, fresh. Complete.

It is not clear as to whether this is an original Tantra or a compilation based on one. It deals with the cult of Yakṣiṇīs.

Beginning :—

ॐ श्रीगणेशाय नमः ।

ॐ बालेन्दुगौर्द्धवज्रलजटाजटिलमौलये ।
त्रिपुरान्ध(न्त)ध्वजध्वंसपण्डिताय पिनाकिने ॥
करङ्किणीमते तन्त्रे सिद्धसावरमन्त्रतः ।
निर्गतं तत्प्रसादेन किञ्चिदुद्दिश्यते मया ॥
विचित्रा विभ्रमा हंसी भीषणाञ्जनरञ्जिका ।
विशाला मदना घण्टा कालकर्णा महाभया ॥
माहेशी शङ्खिनी चान्द्री श्मशानी वटयक्षिणी ।
मेखला विकला लक्ष्मीः मालिनी शतपत्रिका ॥
सुलोचना सुशोभाढ्या कपाली च पिनाकिनी ।
नटी कामेश्वरी देवी कर्णरेखा च सुन्दरी ॥
मनोहरी प्रमोदा तु खड्गिनी नखकेशिनी ।
भोगिनी पद्मिनी पूर्णा स्वर्णवती रतिप्रया ॥
इति षट्त्रिंशदाख्याता यक्षिण्यो वरसिद्धिदाः ।
करङ्किणीमते तन्त्रे शम्भुदेवेन भाषिताः ॥
आराधनमहं तासां प्रवक्ष्यामि समासतः ।

End :—

पिशाचिनी भवेत्तुष्टा कर्म्मान्ते भोजने कृते ।
सप्तविंशतिदीनारान् प्रत्यहं संप्रयच्छति ॥
ॐ चच्चितौ पिशाचिनि स्वाहा ।

Colophon :—

इति यक्षिणीकल्पः सम्पूर्णः समाप्तः ।
शुभमस्तु लेखकपाठकयोः ।

6029.

155. गायत्रीब्राह्मणोल्लासतन्त्रम् ।

Gāyatrībrāhmaṇollāsatantram.

Substance, country-made paper. Folia, 38. Lines, 6 on a page. Extent in ślokas, 875. Character, Bengali. Appearance, old. Complete in five chapters.

The present MS has been described in L. I. 481. The work, in five chapters, has been published in the *Vividhatantrasaṃgraha* and the *Sulabhatantraprakāśa* under the name of *Gāyatrītantra.*

The list of contents given at the end of the manuscript :—

अथ गायत्रीतन्त्रनिर्घण्टनं ।

गायत्रीध्यानकथनम् १, ऋष्यादिन्यासकथनम् १, मुद्राकथनम् २, वर्णन्यासकथनम् २, अक्षरवर्णकथनम् २, त्रिपदागायत्रीकथनम् २, प्रणवमेरुसेतुकथनम् ३, गायत्रीकथनम् ३, क्षत्रियवैश्ययोर्द्विपदागायत्रीकथनम् ३, गायत्रीवर्णस्य देवताकथनम् ३, गायत्रीपुटितेष्टमन्त्रकथनम् ४, गायत्रीजीवात्मनोरभेदकथनम् ४, ग्रहणे गायत्रीजपे दशांशहोमादिनिषेधकथनम् ४, आधाराधेयकथनम् ४, गणेशादिपूजाकथनम् ५, लिङ्गस्य पूजातत्त्वकथनम् ६, लिङ्गस्थदेवीध्यानकथनम् ६, शिवलिङ्गस्य तत्त्वाज्ञाने विकलकथनम् ७, शिवलिङ्गविशेषपूजाकथनम् ७, स्वर्णलिङ्गदानफलकथनम् ७, शिव इति वर्णद्वयार्थकथनम् ८, शिव-

शब्दाज्ञानपूजने निन्दाकथनम् ८, गायत्र्यक्षरचिन्तनफलकथनम् ९, गायत्र्याचमनं कृत्वा गायत्रीजपकथनम् ९, जातिभेदेन गायत्रीजपकथनम् १०, गायत्रीध्यानकथनम् ११, न्यासव्युत्पत्तिकथनम् ११, भूतशुद्धिव्युत्पत्तिकथनम् ११, प्राणायामव्युत्पत्तिकथनम् ११, सन्ध्याव्युत्पत्तिकथनम् ११, शूद्रात् पुराणश्रवणे दोषकथनम् १२, माटकार्थज्ञानेनाचार्य्यकथनम् १२, सन्ध्याध्यानकथनम् १२, गायत्रीस्थाननिर्णयकथनम् १२, प्रकृतिपुरुषशब्दार्थकथनम् १३, प्रणवपुटित-गायत्रीवर्णजपकथनम् १३, क्षत्रियादिशब्दार्थकथनम् १४, याज्ञवल्क्येन प्रणवद्वयोक्तकथनम् १४, नवसूत्रार्थकथनम् १४, अनुस्वारार्थकथनम् १५, पुनःपुनः कथने आगमे दोषाभावकथनम् १५, पञ्चाङ्गकथनम् १५, गायत्र्यक्षरेण शरीरकथनम् १६, शरीरस्थूलदेहयोर्भिन्नकथनम् १६, स्त्रीपुंनपुंसकत्रिविधदेहकथनम् १६, विसर्गार्थविन्दुद्वयकथनम् १६, श्रीविन्दुकथनम् १७, पापपुरुषात् पापोत्पत्तिकथनम् १७, प्रकृतिविकृतेः पुण्यपापकथनम् १७, अजपाभूरादिब्राह्मणीकथनम् १७, वकारखकारान्ते विसर्गध्यानकथनम् १७, दन्तमध्ये श्वावदन्तकथनम् १८, गायत्रीब्राह्मणकथनम् १८, ब्राह्मणस्योत्तमादिकथनम् १९, ब्राह्मणार्थे पक्वान्ने शूद्राशादोषकथनम् २०, मन्त्रगुरुत्यागदोषकथनम् २१, अशौचान्तदिने शूद्रगृहे द्रव्यभोजनादिदोषकथनम् २१, जले गायत्रीजपकथनम् २१, प्रेतोद्देशे देयद्रव्य इच्छादोषकथनम् २१, शूद्रमुखव्याख्याश्रवणदोषकथनम् २१, शूद्रगृहात् पाठदोषकथनम् २१, ध्यानकथनम् २२, जातिसाधारणे ज्ञानदानकथनम् २३, सत्शूद्रारचितयज्ञसूत्रग्रहणकथनम् २३, यज्ञसूत्रग्रन्थिकाले ब्रह्मादिस्मरणकथनम् २३, ग्रहणे शूद्रयाजकस्य चाण्डालत्वकथनम् २६, अशौचे सर्व्वदेवानां तान्त्रिकस्नानसन्ध्यापूजादिकथनम् २५, वामाङ्गुष्ठे यज्ञसूत्रमार्ज्जनकथनम् २३, यज्ञसूत्र-प्राणप्रतिष्ठाकथनम् २४, अशौचे शिवपूजाविधिकथनम् २५, गायत्रीरहितस्य जलादियवनान्नसमत्वकथनम्, तथाविधब्राह्मणसंसर्गिप्रायश्चित्तकथनम्, यज्ञसूत्रदानप्रमाणकथनम्, गोहत्याप्रायश्चित्तकथनम्, शालग्रामनिकटे स्पर्शाद्या दिव्यकरणदोषकथनम्, गङ्गोदकादौ दिव्यदोषकथनम्, शूद्रानिकटे पुराणादिपाठनिषेधकथनम्, पुराणशब्दार्थकथनम्, यज्ञसूत्रपरीक्षाकथनम्, वामस्कन्धे यज्ञोपवीतधारणकथनम्, गायत्रीदीपनीकथनम्, घृतकाञ्चनकलितब्राह्मणस्य दिव्यनिषेधकथनम्, शूद्रस्य ब्रह्मचर्य्यनिषेधकथनम्, गायत्र्यर्थाज्ञानेऽपि शुभफलकथनम्,

पूर्व्वजन्मशत्रुरेव ऐहिकशत्रुकथनम् बलिदानप्रशंसाकथनम्, गुरोराज्ञां विना कर्म्मारम्भे दोषकथनम्, शारदीपूजाकथनम्, शरत्कालीयमहाष्टम्यां महाबलिनिषेधकथनम्, महाबलिकथनम्, शुद्धसत्त्वात्मककथनम्, सामवेदादिध्यानमन्त्रकथनम्, कलौ वेदपाठनिषेधकथनम्, सोहं मन्त्रेण स्नानकथनम्, गायत्रीतन्त्रपर्णपत्रकथनम् ।

6030.

10675. *Gāyatrībrāhmaṇollāsatantram.*

Substance, country-made paper. 15 × 3¼ inches. Folia, 29 (marked 7–35). Lines, 8 on a page. Extent in ślokas, 850. Character, Bengali. Appearance, discoloured. Complete in five chapters.

Post Colophon :—

गगगो + जातुकर्णजयाविजयासम्वादे आगमसन्दर्भः समाप्तः श्रीनाथस्वामी । श्रीउमाकान्तशर्म्मणस्य ।

6031.

8435. सनत्कुमारसंहिता । *Sanatkumārasaṃhitā.*

Substance, country-made paper. 9¼ × 3½ inches. Folia, 18. Lines, 10 on a page. Extent in ślokas, 540. Character, Nāgara. Date, Śaka 1611. Appearance, discoloured. Complete in 11 chapters.

This is a Vaiṣṇava Tantra in the form of a dialogue between Sanatkumāra and Pulastya.

The work, under the name *Sanatkumāratantra*, has been published in the *Vividhatantrasaṃgraha* and described in L. I. 239.

Post Colophon :—

शुभमस्तु । श्रीकृष्णाय नमः । शाके १६११ मार्गशिर-शुक्लद्वितीयायां श्रीरत्नेश्वरेण लिखितम् ।

6032.

4520. कामधेनुतन्त्रम् । *Kāmadhenutantram.*

Substance, country-made yellow paper. 13 × 3½ inches. Folia, 36. Lines, 7 on a page. Extent in ślokas, 980. Character, modern Bengali. Appearance, fresh. Complete in 24 chapters.

The Kāmadhenutantra in the present manuscript is complete in 24 paṭalas, whereas the printed editions in the *Vividhatantrasaṃgraha* and the *Sulabhatantraprakāśa* have 21.

Beginnings of the chapters XXII–XXIV :—

Chapter XXII :—

श्रीदेव्युवाच ।

देवदेव महादेव कृपया परमेश्वर ।
चन्द्रपर्व्वं सूर्य्यपर्व्वं मेघाच्छन्नं भवेद्यदि ॥
किं कर्त्तव्यं तदा देव जपहोमादिकर्म्मणः ।

Chapter XXIII :—

श्रीशिव उवाच ।

अपरैकं प्रवक्ष्यामि कामधेनोर्मतं शृणु ।
निर्म्माय लिङ्गं चार्व्वङ्गि शुद्धगोमयभस्मना ॥
ताम्रपात्रं च संस्थाप्य ब्रह्मरन्ध्रे शिवोपरि ।
निर्म्माय विधिवल्लिङ्गं सर्व्वं पार्थिववत् प्रिये ॥
तस्य पूजाफलं भद्रे मम ज्ञाने वरानने ।
कथितुं नैव शक्नोमि कल्पकोटिशतैरपि ॥

Chapter XXIV :—

श्रीदेव्युवाच ।

मालारहस्यं योगेन्द्र कथयस्व कृपानिधे ।
यदि पुच्छाज्जपेन्मन्त्रं हरेत्तेजांसि तन्मुखम् ॥
मुखाद्यदि जपेन्मन्त्रं पुच्छश्च चञ्चलं भवेत् ।
चञ्चले सति चार्व्वङ्गि तज्जपं विफलं भवेत् ॥

6033.

3993. माहेश्वरतन्त्रम् । *Māheśvaratantram.*

Substance, country-made paper. 14 × 5½ inches. Folia, 168. Lines, 8 on a page. Extent in ślokas, 3,528. Character, Nāgara. Appearance, fresh. Date, Saṃvat, 1946. Complete in 51 Paṭalas.

The present MS contains the last part of the work in 51 chapters which describe the story of Kṛṣṇa and his greatness and lays down the rules of his worship.

Beginning :—

श्रीगणेशाय नमः ।

देवदेव महादेव करुणार्णवशङ्कर ।
हर शम्भो शिवम्मृदु पशुनाथ नमोऽस्तु ते ॥
नमस्ते सर्व्वदेवानां दैवताय परात्मने ।
पिनाकिने नमस्तुभ्यं गङ्गाधर नमोऽस्तु ते ॥
भूतिभूषितदेहस्य भक्तानामभयङ्कर ।
कर्पूरविशदाभाय त्रिनेत्राय नमोऽस्तु ते ॥
... ...
त्वया प्रोक्तानि तन्त्राणि चतुःषष्टिमितानि भोः ।
न तेषु तत्त्वविज्ञानं प्रकटीकृतमीश्वर ॥
तत् प्रकाशय देवेश प्रवक्तुं यदि मन्यसे ।

शिव उवाच ।

नैतज्ज्ञानं वरारोहे वक्तुं योग्यं वरानने ।
राज्यं देयं शिरो देयं देयं सर्व्वस्वमप्युत ॥
न देयं ब्रह्मविज्ञानं सत्यं सत्यं शुचिस्मिते ।
ब्रह्महत्यासहस्राणि कृत्वा यत् पापमश्नुते ॥

तत् पापं लभते देवि परमार्थप्रकाशनात् ।

... ...

... ...

तस्मात्तु गोपयेद्विद्वान् जननीजारगर्भवत् ।

End :—

इत्युक्त्वा पार्व्वतीचित्ते लीलामाधाय वर्णिताम् ।
अवाप परमानन्दं हर्षाश्रुपुलकाङ्किता ॥ ११५

Colophons of the different chapters :—

5A, इति श्रीमन्माहेश्वरतन्त्रे ज्ञानखण्डे प्रथमं पटलम्; 9B, श्रीमन्माहेश्वरतन्त्रे शिवोमासम्वादे द्वितीयं पटलम्; 15A, ०तत्त्वसारे उत्तरखण्डे तृतीयं पटलम्; 19B, ०शिवपार्व्वतीसम्वादे चतुर्थः पटलः; 22B, इति श्रीमन्माहेश्वरतन्त्रे पञ्चमं पटलम्; 26A, इति श्रीमन्माहेश्वरतन्त्रे शिवपार्व्वतीसम्वादे तत्त्वसारे उत्तरखण्डे षष्ठपटलम्; 32A, ०शिवपार्व्वतीसम्वादे उत्तरखण्डे सप्तमं पटलम्; 34A, इति श्रीमन्माहेश्वरतन्त्रे अष्टमं पटलम्; 35A, ०नवमं पटलम्; 38A, ०दशमं पटलम्; 41B, ०एकादशमं पटलम्; 44A, ०द्वादशपटलम्; 47A, ०त्रयोदशमं पटलम्; 49A, इति श्रीमन्माहेश्वरतन्त्रे गुप्तसारे चतुर्द्दशमं पटलम्; 51B, इति श्रीमाहेश्वरतन्त्रे पञ्चदशमं पटलम्; 53B, ०षोडशमं पटलम्; 57A, ०सप्त[दश]मं पटलम्; 60B, ०उत्तरखण्डे अष्टादशमं पटलम्; 63B, ०एकोनविंशतिमं पटलम्; 67A, ०विंशतिमं पटलम्; 70B, ०एकविंशतितमं पटलम्; 73A, ०द्वाविंशतिमं पटलम्; 75B, ०त्रयोविंशतिमं पटलम्; 77B, ०चतुर्व्विंशतिमं पटलम्; 79B, ०पञ्चविंशतिमं पटलं; 82A, ०षड्विंशतिमं पटलम्; 85A, ०सप्तविंशतिमं पटलम्; 89B, ०शिवोमासंवादे अष्टाविंशतिमं पटलम्; 92A, ०गुप्तसारे अष्टाविंशतितमं पटलम्; 94B, ०एकोनत्रिंशत्तमं पटलम्; 97B, ०त्रिंशत्तमं पटलम्; 102A, ०एकत्रिंशत्तमं पटलम्; 106B, इति श्रीमन्माहेश्वरतन्त्रे उत्तरखण्डे शिवोमासम्वादे मन्त्रपुरश्चरणविधिनिरूपणं नाम द्वात्रिंशत्तमं पटलम्; 109B, इति श्रीमन्माहेश्वरतन्त्रे शिवगौरीसम्वादे दशावस्थागमननिरूपणं त्रयस्त्रिंशः पटलः; 111A, ०चतुस्त्रिंशः पटलः; 112B, ०पञ्चत्रिंशपटलम्;

114A, ॰षट्त्रिंशः पटलः; 119B, ॰सप्तत्रिंशपटलम्; 123A, ॰अष्टत्रिंश-पटलम्; 126B, ॰एकोनचत्वारिंशं पटलम्; 129A, ॰चत्वारिंशपटलम्; 131A, ॰एकचत्वारिंशत्तमं पटलम्; 134A, ॰द्विचत्वारिंशत्तमपटलम्; 136B, ॰त्रिचत्वारिंशत्तमं पटलम्; 141B, ॰चतुश्चत्वारिंशत्तमं पटलम्; 146A, ॰पञ्चचत्वारिंशत्तमपटलम्; 147B, ॰षट्चत्वारिंशत्तमपटलम्; 149B, ॰पुरुषोत्तमस्तवो नाम सप्तचत्वारिंशत्तमं पटलम्; 152B, ॰अष्टचत्वारिंशत्तमं पटलम्; 157B, ॰ऊनपञ्चाशत्तमं पटलम्; 162A, ॰गोलोकवर्णने पञ्चाशत्तम-पटलम्; 168B, ॰उत्तरखण्डे एकपञ्चाशत्तमः पटलः।

Post Colophon :—

सम्पूर्णमिदं माहेश्वरतन्त्रम्। शुभमस्तु। संवत् १९४६ पुस कृष्ण १० मङ्गल।

6034.

2887. **राजराजेश्वरीतन्त्रे शाक्ताभिषेकः।** *Śāktābhiṣekaḥ from the Rājarājeśvarītantram.*

Substance, country-made yellow paper. 16 × 4 inches. Folia, 3. Lines, 8 on a page. Extent in ślokas, 80. Character, Bengali. Appearance, fresh. Complete.

Another MS of the work is noticed in VSP (p. 45).

Colophon :—

इति राजराजेश्वरीतन्त्रे देवीश्वरसंवादे शाक्ताभिषेकः समाप्तः।

Beginning :—

ईश्वर उवाच।

गुप्तं सर्व्वेषु तन्त्रेषु तव स्नेहेन पार्व्वती।
अभिषेकं प्रवक्ष्यामि सर्व्वरोगभयापहम्॥
धनं यशस्यमायुष्यं सर्व्वपातकनाशनम्।
सर्व्वाशापूरकं सर्व्वमन्त्रदोषनिवारणम्॥

... ...

... ...

विकारे देशिकः कुर्य्यादभिषेकं विचक्षणः ।

असौभाग्ये च नारीणामभिषेकः प्रवर्त्तते ॥

6035.

3927. शाम्भवीतन्त्रे ज्ञानसङ्कुली ।

Jñānasaṅkulī from the Śāmbhavītantram.

Substance, country-made paper. $13\frac{3}{4} \times 3$ inches. Folia, 9. Lines, 7 on a page. Extent in ślokas, 200. Character, Bengali. Date, Śaka 1757. Appearance, fresh. Complete.

The work deals with Yoga topics. No mention of the name *Śāmbhavītantra* is found in the MS of the work as described in L. IX. 2957. Fragments of the *Śāmbhavītantra* are noticed in VSP (p. 52).

Beginning :—

अथ शाम्भवीतन्त्रम् ।

नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ।

नमामि व्यक्तपुरुषं परं ब्रह्म च सर्व्वदा ॥

... ...

श्रीदेव्युवाच ।

कुतः सृष्टिर्भवेद्देव कथं सृष्टिर्विनश्यति ।

अव्यक्तं ब्रह्मणो ज्ञानं सृष्टिसंहारवर्ज्जितम् ॥

ब्रह्मज्ञानं कथं देव सृष्टिसंहारवर्ज्जितम् ।

End :—

अनुपमं निराधारं निःशब्दं शब्द उच्यते ।

अचलत् निर्मलं चैव शून्यव्यापी निरञ्जनम् ॥

वेदान्तसारसर्वस्व + मात्रे शिवभाषितम् ।

सिध्यन्ति सर्वयोगिनां नात्र कार्य्या विचारणा ॥

Colophon :—

इति श्रीयोगशास्त्रे शाम्भवीतन्त्रे उमामहेश्वरसंवादे ज्ञानसंकुली समाप्ता ।

Post Colophon :—

श्रीकृष्णमोहन देवशर्म्मणो लिपिरियम् । शक १७ । ५७ । ११ भाद्रस्य ।

6036.

4596. नितान्ततन्त्रे पुरश्चर्याविधिः । *Puraścaryāvidhi from the Nitāntatantram.*

Substance, country-made paper. $16\frac{1}{2} \times 4$ inches. Folia, 4. Lines, 8 on a page. Extent in ślokas, 84. Character, modern Bengali. Appearance, fresh. Incomplete.

The work has been described in L. I. 387 under the name *Saṃkṣepapuraścaraṇa.* A MS of the work has been noticed in VSP (p. 37).

Beginning :—

ॐ नमो गणेशाय ।

नितान्ततन्त्रे ।

संक्षेपेण पुरश्चर्य्यां वक्ष्यामि शृणु पार्व्वति ।
यां कृत्वा साधको देवि परं मोक्षमवाप्नुयात् ॥
अशेषदुरितध्वंसो मन्त्रसिद्धिर्भवेद्यतः ।
काम्यसिद्धिर्ज्ञानसिद्धिर्भवेदेव न संशयः ॥

6037.

266. भावचिन्तामणिः । *Bhāvacintāmaṇi.*

Substance, country-made paper. $11\frac{3}{4} \times 6$ inches. Folia, 4. Lines, 13 on a page. Extent in ślokas, 133. Character, Nāgara. Date, Saṃvat 1796. Appearance, new. Complete in six chapters.

The present MS has been described in L. IV. 1520. It contains the sixth chapter of the work, dealing with the good and bad omens for children as indicated by the positions of astronomical bodies. The MS seems to be the concluding part of a bigger work called सन्तानदीपिका, which name occurs in the last colophon and on the left margin of Fol. 1A, 3B.

6038.

10826. **विश्वसारतन्त्रे गूढावतारः ।** *Gūḍhāvatāra from the Viśvasāratantram.*

Substance, country-made paper. 13 × 4½ inches. Folia, 2. Lines, 12 on a page. Extent in ślokas, 58. Character, Bengali. Appearance, discoloured. Complete.

In the form of an interlocution between Śiva and Pārvatī it gives an account of the incarnation of Viṣṇu as Caitanya. The mantra and gāyatrī of Caitanya are also given.

This very topic is assigned in VSP (p. 50) to the 11th chapter of the last part of the *Viśvasāroddhāra Tantra* and not to that of the *Viśvasāra* as in the present MS.

Beginning :—

श्रीश्रीराधाकृष्ण ।

श्रीपार्व्वत्युवाच ।

सर्व्वं श्रुतं महादेव त्वद्वक्त्रात् कवचादिकम् ।
मन्त्रपूजाविधिश्चैव श्रुतं योगादिका क्रिया ॥
साम्प्रतं श्रोतुमिच्छामि देवानामपि दुर्ल्लभम् ।
गोलोकान्दकनाथस्य गूढावतरणं कलौ ॥
... ...

सदाशिव उवाच ।

... ...
श्रीनवद्वीपमध्ये कलौ प्रथमसन्ध्यायाम् ।
हरिजनि[र]भूत् गौराङ्गदेहः स्वयम् ॥

... ...

गङ्गाया दक्षिणे भागे नवद्वीपे मनोहरे ।

कलिपापविनाशाय शचीगर्भे सनातनः ॥

... ...

षडष्टवाणवेदेन कलेरब्दे समागते ।

जम्बुद्वीपे पुण्यक्षेत्रे वर्षे भारतसंज्ञके ।

जनिष्यसि प्रीयमिश्रपुरन्दरगृहे स्वयम् ॥

Colophon :—

इति विश्वसारतन्त्रे उत्तराखण्डे हरपार्व्वतीसंवादे श्रीगोलोकनाथस्य कलौ गूढावतारमेकादशपटलः समाप्तः ।

Post Colophon :—

शाके सप्त विधुः षडेव मुनिना मासे शुचौ ॥

6039.

4650. महानिर्व्वाणतन्त्रम् । *Mahānirvāṇatantram.*

Substance, country-made paper. 19 × 4½ inches. Folia, 106. Lines 7 on a page. Extent in ślokas, 2,940. Character, Bengali. Appearance, fresh. Complete.

The present MS contains the first part in 19 chapters. The work has been published in the *Vividhatantrasaṃgraha* and in the *Tantrik Texts* of Arthur Avalon (Calcutta, 1929). For various other editions of the work cf. BM 1892–1906, p. 718; 1906–1928, p. 1074.

Post Colophon :—

श्रीरामशिवशर्म्मणः पुस्तिकेयम् ।

6040.

5844A. हारकतन्त्रम् । *Hārakatantram.*

Substance, country-made paper. 8 × 4¼ inches. Folia, 1 to 7, 24 to 27. Lines, 9 on a page. Extent in ślokas, 125. Character, Nāgara. Appearance, discoloured. Incomplete.

The present MS contains only three sections of the work.

Beginning :—

श्रीगणेशाय नमः ।

श्रीपार्व्वत्युवाच ।

देवदेव जगन्नाथ तपश्चर्य्यादिसाधनम् ।
पञ्चद्वादशवह्नीनां साधनं हि मुमुक्षूणाम् ॥

शङ्कर उवाच ।

शृणुष्वापर्णे यत्नेन कथयामि समासतः ।
पञ्चाग्नेर्द्वादशादीनां साधनं सम्यगुच्यते ॥
पञ्चाग्निसाधनार्थाय प्राचीं संसाध्य यत्नतः ।
तत्र । प्राचीसंसाधनार्थाय भूमिसंशोधनं कुर्य्यात् ।

This section breaks off abruptly at the 7th leaf.

On Fol. 24 begins धूमपानविधि as follows :—

अथ वक्ष्ये महेशानि धूमपानविधिं शुभम् ।
यस्यानुष्ठानमन्त्रेण देवता सम्प्रसीदति ॥
प्राचीं संसाध्य यत्नेन शुभतीर्थोपपीठके ।
कृत्वा वेदिं चतुर्हस्तां मण्डपाच्छादितां शुभाम् ॥
पताकातोरणाद्येन कलसेनोपशोभिताम् ।
मण्डपस्याष्टदिग्भागे लोकपालान् यजेन्मुहुः ॥
भैरवं ब्रह्मशक्तिं च तोषयेद्बलिदानतः ।
वेद्या दक्षिणसौम्ये तु कूपयुग्मं खनेद्भुवि ॥

25A, कुण्डमध्ये विधंती च अङ्गुलैकेन निश्चितम् ।
नालेन च समायुक्ता सिन्दूररजसान्विता ॥
सात्त्विकी राजसी चैव मेखला चोर्द्धतः क्रमात् ।
इति कुण्डविनिर्म्माणं पश्चात् कर्म्म शृणुष्व तत् ॥

25B, तत्रैवाग्निं प्रतिष्ठाप्य यवव्रीहितिलान् बहून् ।
होमयेन्मन्त्रगायत्र्या साज्यान् मन्त्रसुसिद्धये ॥
शतमष्टोत्तरं कृत्वा तथा मन्त्रस्य सिद्धये ।
देवतावरणानाञ्च शरावेन पिधानकम् ॥
शरावमध्यदेशे तु बिलं तच्चतुरङ्गुलम् ।
तस्योपरि न्यसेत् श्लक्ष्णां नलिकां षोडशाङ्गुलाम् ॥
मूले स्थूला च सरला संकोचाग्रा बिलान्विता ।
तस्योपरि स्वयं तिष्ठेत् लम्बमानमधोमुखः ॥
स्थूणामध्यविभागे तु र[ज्जु]द्वयपदाम्बुजः ।
नलिकाग्रे मुखं क्षिप्यं धूममघ्राच्छनैः शनैः ॥

On Fol. 26B begins शीतसाधनविधि as follows :—

ईश्वर उवाच ।
अथ वक्ष्ये महेशानि शीतसाधनकर्म्मणः ।
विधानं शृणु मन्त्राणां साधनं परमं मतम् ॥
शुद्धं जलाशयं प्राप्य नद्या वाथ तटाकजं ।
प्रवाहरोधनं कृत्वा मध्ये वेदीं प्रकल्प्य च ॥
सिकतापूरिता शुद्धा पूर्व्ववद्बलिदानतः ।
ध्वजभूषणभूषाद्यां शान्तिकल्प यथाविधि ॥
तत्रोपविष्टो नियतमाकण्ठजलमध्यगः ।
रात्रे[ः] प्रहरशेषे तु मुहूर्त्तत्रितयावधि(ः) ॥
दिवा भवति यावद्वै तावन्मन्त्र[ं] समभ्यसेत् ।
जलमातृ[ः] प्रपूज्यादौ घृतधाराभिरन्वहम् ॥
गुरूपदिष्टविधिना देवताभावसिद्धये ।
मार्गपूर्णां समारभ्य यावत् फाल्गुणिपूर्णिमा ॥
तावत् कार्य्यं प्रयत्नेन शीतसाधनमुत्तमम् ।

6041.

5844B. भैरवतन्त्रम् । *Bhairavatantram.*

Substance, country-made paper. 8×4¼ inches. Folia, 27B–29, 31–36, 7-8. Lines, 8, 9 on a page. Extent in ślokas, 115. Character, Nāgara. Appearance, old. Incomplete.

Topics (like वह्निसाधन, धूमपान and शीतसाधन) which are here stated (Fol. 32A) to have been dealt with previously (apparently in the earlier parts of the work) are found in what is called the *Hārakatantra* in another part of the same MS described under the previous number.

Beginning :—

अथ भैरवतन्त्रोक्त-मन्त्रग्रहविधि[:] लिख्यते ॥

पार्व्वत्युवाच ।

देवदेव जगन्नाथ शूलिन् त्रैलोक्यपावन ।
मन्त्राणां साधनोपायं वद मे त्वं जगद्गुरो ॥
कर्म्मणा येन जन्तूनां मन्त्राणां सिद्धिरुत्तमा ।
धर्म्मार्थकाममोक्षाणां जायते तद्वदाशु माम् ॥
भूर्भुवःस्वः पतिस्त्वं च शक्रादिमरुतां तथा ।
... ...
स्थावरं जङ्गमं विश्वं यस्य दृष्ट्यवलोकनम् ।
उदयञ्च क्षयं याति तन्मे कथय शङ्कर ॥

ईश्वर उवाच ।

साधु पृष्टं महादेवि सर्व्वब्रह्माण्डमण्डपे ।
मन्त्राणां साधनोपायं सर्व्वसिद्धैकसाधनम् ॥
धर्म्मार्थकाममोक्षाणां साधनं परमं महत् ।
भूरादीनां हि लोकानां शक्रादीनां तथा परां ॥
रम्भादिललनानां च भोक्तृत्वस्यैकसाधनम् ।
चराचरस्य विश्वस्य तथा पातालवासिनाम् ॥

प्रभुत्वं यान्ति येनाशु सुरपूज्यो भवेन्नरः ।
तस्योपायमहं वच्ये तच्छृणुष्व शुभेक्षणे ॥
... ...
... ...

29A, सिद्ध(सौद्ध)साध्यादिभिर्भेदैः शुद्धमन्त्रं विचारयेत् ।
ऋणादि-सिद्धिसहित मन्त्रदीक्षां विधानतः ॥
... ...
... ...
+ + + मनसा ध्यायन् पुरश्चर्य्यां समाचरेत् ॥
जपहोमादिभिर्नूनं देवताभावमाप्य च ।
राज्यलोभादिसम्पन्नः श्रीगुरोराज्ञया पुनः ॥
तपश्चतुर्विधं कुर्य्यात् वसन्तादिऋतुष्वपि ।
वह्न्यर्कधूमशीतानां साधनन्तु क्रमाच्छिवे ॥
वह्नेस्तु साधनं प्रोक्तं एकपञ्चनवात्मना ।
द्वादशानां तथा + + साधनं परमं महत् ॥
श्रौतं वा स्मार्त्तजं वापि स्वस्यैव सुखसिद्धिदम् ।
सूर्य्यकान्तसमुद्भवं श्रेष्ठमध्याधमं कुरु ॥
लौकिकाग्निः परो निन्द्यः स चेद्ग्राह्यो यदा भवेत् ।
श्रोत्रियाङ्गारको ग्राह्यो नान्यो ग्राह्यः कदाचन ॥

The only colophon found in this MS runs as follows :—

32A, इति भैरवतन्त्रे ईश्वरपार्व्वतीसंवादे एकादि-द्वादशाग्नेः साधनं समाप्तम् ।

On Fol. 32A begins a new section as follows :—

श्रीदेव्युवाच ।
महादेव महेशान तपोराशे जगत्पते ।
भुवनान्तरसंस्थानां मन्त्रसिद्धिप्रदायक ॥

एकेन साधनेनैव साधिताः सर्व्वसिद्धयः ।
भवन्ति नियतं शम्भो भूतनाथ जगत्पते ॥
सिद्धोपायं परं ब्रूहि मन्त्रसाधनसिद्धये ।
कृपया देवदेवेश यद्यहं तव वल्लभा ॥
कथितं ते पुरानाथ अग्न्याकाशनिवासकम् ।
धूमपानञ्च शीतस्य साधनं परमं हितम् ॥
एकेन कर्म्मणा सिद्धिर्भवेत् पुंसां शिवात्मनाम् ।
चतुर्भिर्या भवेत् सिद्धिः सा सिद्धिः प्राप्यते नृणाम् ॥

भैरव उवाच ।

साधु पृष्टं महेशानि साधकानां हिताय च ।
अनुग्रहाय लोकानां मन्त्रसिद्धिकरं परम् ॥
सर्व्वानुष्ठानतः श्रेष्ठं तपसः साधनं परम् ।
कथयामि महेशानि परं श्रेयोधिसाधनम् ॥
धर्म्मार्थकाममोक्षाणां साधनं लघुरीरितम् ।
भूर्भुवःस्वादिलोकानां कैलासावधिवासिनां ॥
लघुत्वकरणं श्रेष्ठं यन्मेरोः साधनं परम् ।
शृणुष्वैकाग्रमनसा यदि पृच्छसि भामिनि ॥
नदीतीरे पर्व्वतवरे पुण्यक्षेत्रे शिवालये ।
शक्तिक्षेत्रे शुभे पीठे श्मशाने वा सुरेश्वरि ॥
भूमिं समां विधायाथ सवर्णां चित्तरञ्जिनीम् ।
सिद्धिदां कूर्म्मसदृशीं विंशद्धस्तां सुशोभिनीं ॥

6042.

2162. भैरवीतन्त्रे भैरवदीपदानविधिः ।

Bhairavadīpadānavidhi from the Bhairavītantram.

Substance, country-made paper. 10 × 5 inches. Folium, 1. Lines, 20 on a page. Extent in ślokas, 22. Character, Nāgara. Appearance, fresh. Complete.

The present MS has been described in L. X. 4044. It describes the process of the offering of lamps to Vaṭuka-bhairava.

Post Colophon :—

संवत् १८१८ माघ सु ४ लि ।

6043.

4802. **मेरुतन्त्रम् ।** *Merutantram.*

Substance, Nepalese paper. 12 × 4 inches. Folia, 86. Lines, 9 on a page. Extent in ślokas, 2,500. Character, Newari. Appearance, old and discoloured. Incomplete.

The present MS contains chapters VI–X of the work. The whole work in 35 chapters has been published by Kshemaraj Krishnadas (Bombay, 1908). For a description of the work see HPR. I. 294, II. 169, CS. V. 69, I.O. IV. 2570.

6044.

1890. *Merutantram.*

Substance, country-made paper. 9 × 4¼ inches. Folia, 18. Lines, 9 on a page. Extent in ślokas, 300. Character, Nāgara. Appearance, tolerable.

This MS contains the sixth chapter of the work. This chapter deals with Puraścaraṇa.

6045.

10301. *Merutantram.*

Substance, country-made paper. 12 × 6 inches. Folia, 6. Lines, 10 on a page. Extent in ślokas, 180. Character, Nāgara. Date, Saṃvat 1814. Appearance, discoloured.

This MS contains (Fol. 1–5A) the पीठसम्भव (origin and description of the pīṭhas) section of the 10th chapter of the *Merutantra*. The extract given on Fol. 5A f. is incomplete and has no colophon. This portion begins as follows :—

त्रिकोणत्रितयं वृत्तं दलाष्टकविभूषितम् ।
भूपुरेण समाकीर्णं चतुर्द्वारोपशोभितम् ॥
यत्र कापालिनी देव्याः सर्व्वसाम्राज्यदायकम् ।
महाकालीं महालक्ष्मीं महासरस्वतीं तथा ॥
रतिप्रीति तथा कान्ति द्वितीयेत्थं तृतीयके ।
इच्छाज्ञानक्रियां चैव त्रिकोणे तु तृतीयके ॥
मध्ये कपालिनीं पूज्य दलाष्टौ मातृकार्च्चनम् ।
ततोष्टौ भैरवाश्चैव दिगीशान् सास्त्रकान् यजेत् ॥

Post Colophon :—

संवत् १८१४ वर्षे कार्त्तिक सुदि १५ शुक्रवार । लिखितं विद्यारथी वटुकनाथ देवशर्म्मा ।

6046.

3917D. योनिमन्त्रचिन्तामणितन्त्रम् । *Yonimantra-cintāmaṇitantram.*

Substance, country-made paper. 14 × 4 inches. Folia, 30B–32A. Lines, 11 on a page. In tripāṭha form. Character, Bengali. Appearance, old. Incomplete.

This MS contains only one chapter of the work dealing with the worship of the *Yoni* and cognate matters.

Beginning :—

ईश्वर उवाच ।

... ...

आधारोक्तक्रमं कृत्वा साक्षाद्गणपतिर्भवेत् ॥
हृदयञ्च ततो गत्वा मुद्रां बद्ध्वा पुरातनीम् ।

End :—

योनिबीजं महेशानि प्रतिपत्रे जपेत् प्रिये ।

ततस्तु योनिकवचं..... ॥

The *yonikavaca* referred to here then follows. It is styled त्रैलोक्यमङ्गल .

Colophon :—

इति योनिमन्त्रचिन्तामणितन्त्रे देवीश्वरसम्वादे प्रथमः पटलः ।

6047.

3176. निगमलतातन्त्रम् । *Nigamalatātantram.*

Substance, European foolscap paper. 13×4¼ inches. Folia, 51. Lines, 9 on a page. Extent in ślokas, 900. Character, Bengali. Appearance, fresh. Complete in 40 chapters.

One MS of the work, complete in 24 chapters, corresponding to 27 chapters of the present MS, is described in HPR. I. 204. L. II. 699 describes another incomplete MS containing chapters IV–XV inclusive. VSP (p. 37) notices a MS of it running up to the 40th chapter.

Of the various deities mentioned in this work reference may be made to Vairocana, Śaṅkha, Pāṇḍava, Māmaka, Asita, Padmāntaka, Narakāntaka (Fol. 17A), Maṇidharī-vajriṇī, Mahāpratisarā (Fol. 18A), Akṣobhya (Fol. 20A, where he is called a ṛṣi, and Fol. 26B). The work deals with the details of Kaula worship.

Post Colophon Statement :—

ॐ नमः शिवपार्व्वतीभ्याम् ॥

पुस्तकमिदं श्रीकृष्णानन्दशर्म्मणः ।

6048.

3450. *Nigamalatātantram.*

Substance, country-made paper. 18 × 6½ inches. Folia, 17. Lines, 12 on a page. Extent in ślokas, 600. Character, Bengali. Appearance, fresh. Complete in 24 Paṭalas.

The present MS contains the first 27 chapters of the MS described under the previous number.

6049.

185. निगमतत्त्वसारः । *Nigamatattvasāra.*

Substance, country-made yellow paper. Folia, 2–4. Lines, 9–14 on a page. Extent in ślokas, 125. Character, Bengali. Incomplete.

The present MS is noticed in L. I. 407. It begins from the middle of the first chapter and runs up to the end of the third chapter.

The work deals with topics like the accurate mode of application of *mantras* and *stotras*, the recitation of the *caṇḍī*, the purification of the *pañcatattvas*, etc. The second chapter refers in the following words to the omnipotence and omnipresence of Brahman :—

... ...

3A, कामिनीरूपमाश्रित्य कामिनीनां कलेवरे ।
कामोन्मत्तः कामयते परं ब्रह्मैव सर्व्वदा ॥
ऊर्द्धशून्ये गतिस्तस्य मध्यशून्ये स्थितिः स्मृतः ।
शून्यान्ते क्रीडते ब्रह्म को विजानाति तत्त्वतः ॥
ऊर्द्धशून्यं ब्रह्मरन्ध्रं भ्रुवोर्मध्ये तु मध्यमम् ।
मूलाधारेऽप्यधः शून्यं त्रयमेव प्रकीर्त्तितम् ॥
शून्यमूर्द्धं यदा गच्छेत् तदा स्वप्नादिकम् चरेत् ।
मध्यशून्यं यदा गच्छेत् तदा ज्ञानादिचिन्तनम् ॥
अधःशून्ये यदा गच्छेत् तदा कामादिचिन्तनम् ।

ऊर्द्धशून्याद् यदा मध्यं स गच्छति महेश्वर ।
तदा क्रीडादिकं सर्व्वं स करोति न चान्यथा ॥
ऊर्द्धशून्याद् यदा चाधः स गच्छति कुलेश्वर ।
तदा हास्यादिकं सर्व्वं स करोति न चान्यथा ॥
ऊर्द्धशून्याद् यदा चाधः स गच्छति तदा शृणु ।
क्षुधातृष्णादिकं सर्व्वं तदा सोऽपि करोति हि ॥
स्वप्नच्छलेन ब्रह्माण्डं स गच्छति महानिशि ।
गृहे गृहे च गन्तव्यं क्रीडार्थं परमं गुरुः ॥
... ...
... ...
... ...
यदा तु चक्षुषो रन्ध्रमभ्युपैति परं विभुः ।
तदा कण्डूयते सर्व्वं शरीरं हि कुलेश्वर ॥
यदा गच्छेत् लिङ्गरन्ध्रं तदा तापं करोत्यसौ ।
मलेच्छया द्वाररन्ध्रं स गच्छति महेश्वर ॥
मलेच्छा कृमिकीटाद्यैर्महाक्लेशादिसङ्कुलैः ।
कृमिरूपं समाश्रित्य सोऽपि तिष्ठति सर्व्वदा ॥
त्वां मां रूपभेदरूपमाश्रित्य कुलभैरव ।
स तिष्ठति परं ब्रह्म लीलया तु स्वमिच्छया ॥
घटादौ शून्यरूपञ्च पटादौ विह्वलादिकम् ।
धर्म्मादिकाममोक्षार्थं आगमे च वितिष्ठति ॥
क्रियार्थं वेदशास्त्रेषु योगार्थानाञ्च कर्मणि ।
तत्त्वार्थं तर्कशास्त्रेषु निगमेषु निरूपणम् ॥

6050.

2891. *Nigamatattvasāra.*

Substance, country-made yellow paper. $12\frac{1}{2} \times 4\frac{1}{4}$ inches. Folia, 15. Lines, 5 on a page. Extent in ślokas, 437. Character, Bengali. Appearance, fresh. Complete in 11 chapters.

The present MS is described in L. X, 4184.

6051.

4617. *Nigamatattvasāra.*

Substance, country-made paper. 17½ × 4½ inches. Folia, 7. Lines, 10 on a page. Extent in ślokas, 300. Character, Bengali. Appearance, discoloured. Complete in 11 chapters.

6052.

4676. **निगमकल्पद्रुमः ।** *Nigamakalpadruma.*

Substance, country-made paper. 16 × 6 inches. Folia, 8. Lines, 10 on a page. Extent in ślokas, 320. Character, Bengali. Appearance, discoloured. Complete in 10 chapters.

The work has been described in L. I. 293.

The cardinal views of the work appear in the following lines (Fol. 2B-3A) :—

मद्वाक्यसम्भवं योगं नारीदेहेऽस्ति भैरव ।
सप्तलक्ष-महाविद्या[ः] कथिताः तव सुव्रत ॥
रोमकूपे वसन्त्येता मन्त्ररूपा[ः] पृथक् पृथक् ।
यावन्ति सन्ति रोमाणि शरीरे प्राणवल्लभ ॥
तावद्देवाश्च देव्यश्च सन्ति तस्याः कलेवरे ।
तिस्रः कोट्यस्तदर्द्धेन तीर्थानि जाह्नवीजले ।
जाह्नवी योनिमूले च सततं परिसंस्थिता ॥
मूत्रस्थाने सदा मुक्तिं स्थापिताहं न संशयः ॥
प्रकृतिश्च पुमांश्चैव परं ब्रह्म प्रकीर्तितम् ।
पुमान् विन्दुस्तद्वदने नादरूपा जगन्मयी ॥
तयोः संयोगमात्रेण ह्यन्तःपूजा विधीयते ।
निर्गतं यत् परं द्रव्यं तेन सन्तर्प्य देवताम् ॥
शक्तिबन्धोपबन्धेन गोलीभूतं सदा शिवम् ।
देवीं सम्बीक्ष्य ध्यानेन ककारानन्दवर्द्धिनीम् ॥

सकृद्दृष्ट्वा महेशान मुक्तिभाग् जायते नरः ।
अन्तर्यागमिदं प्रोक्तं बाह्ययागं ततोऽधिकम् ।
विन्दुलिङ्गं शिवः पुंसः योनिर्नादस्वरूपिणी ॥
नादविन्दुसमायोगादमृतं यच्च भैरव ।
तेनामृतेन द्रव्येण तर्पयेत् परदेवताम् ॥

6053.

8432. *Nigamakalpadruma.*

Substance, foolscap paper. 8 × 4 inches. Folia, 14. Lines, 9 on a page. Extent in ślokas, 350. Character, modern Nāgara. Appearance, fresh. Complete in ten chapters.

The following verses are found after the tenth Paṭala.

मीनो येन न खादितो न चनकं वेश्यापि नालिङ्गिता
कन्या येन न सेविता रतिसुखे पीतं न मद्यं तृषा ।
पुत्री येन सहोदरा न जनिता मांसं च नो भक्षितं
व्यर्थं तस्य कुलक्रमं यदि प्रिये माहेश्वरो नैव सः ॥
पूर्णा श्री[भु]वनेश्वरी भगवती श्रीराजराजेश्वरी
पूर्णं भैरवभैरवी च वटुकं पूर्णा सदा कालिका ।
पूर्णा श्रीवगला च धूम्रवदना श्रीच्छिन्नमस्ताम्बिका
पूर्णं श्रीगुरुपादुकामृतरसं श्रीपूर्णपात्रं भजे ॥
या सुरा सा मुदे वियो मदः स महेश्वरः ।
यो वर्णश्च भब्रह्मा यो गन्धः स जनार्दनः ॥
इच्छायां परमा शक्तिः लीलायां किल भैरवः ॥
श्रीपरदेवार्पणमस्तु ॥

The detailed colophon to the first Paṭala in the present MS runs as follows :—

इति निगमकल्पद्रुमे महारहस्ये देवीश्वरसंवादे परमोपनिषत्-सारोद्धारे अद्वैतभावानुभवनिर्वाणनिरूपणो षट्कारामृते प्रथमः पटलः ।

6054.

3368. दक्षिणामूर्त्तिसंहिता । *Dakṣiṇāmūrtisaṃhitā.*

Substance, country-made paper. 14 × 3 inches. Folia, 3–70. Lines, 6 on a page. Extent in ślokas, 1,632. Character, Bengali. Appearance, old and worn out. Incomplete (containing a portion of chapter 2 and chapters 3–60).

The work deals with the worship of various forms of Śakti. MSS of the work are described in IO. IV. 2583, VSP. 34, CS. V. 37 and Ulwar. Extr. 629 (the number of chapters in the last two of which is 66, though their end agrees with that of the present MS).

Colophons of the different chapters :—

3B, इति श्रीदक्षिणामूर्त्ति-संहितायां महालक्ष्मीपूजा द्वितीयः पटलः; 4B, ०त्रिशक्तिलक्ष्मीपूजनविधिस्तृतीय पटलः; 5B, ०साम्राज्यदायिविद्यायजनविधिचतुर्थः पटलः; 6A, ०आत्मा परं ज्योतिर्विद्याराधनविधिः पञ्चमः पटलः; 6B, ०प्रणव-विद्यापरनिष्कलभेदेन समाराधन षष्ठः पटलः; 8B, ०अजपाविधानो नाम सप्तमः पटलः; 10A, ०मातृकासाधनविध्यष्टमः पटलः; 14B, ०त्रिपुरसुन्दरीसमाराधन-नवमः पटलः; 15A, ०पूर्व्वसिंहासनविधिर्दशमः पटलः; 15B, ०ललिताविधिरेका-दशः पटलः; 16A, ०कामेश्वरीपूजाविधिर्द्वादशः पटलः; 16B, ०सिंहासनविधि-स्त्रयोदशः पटलः; ०सिंहासनविधिश्चतुर्दशः पटलः; 17B, ०सञ्जीवनीपूजाविधिः पञ्चदश पटलः; 18A, ०सञ्जीवनीविधिः षोडशः पटलः; 19A, ०वज्रप्रस्तारिणी सप्तदशः पटलः; ०त्रिपुरेशीभैरवी नित्याष्टादशः पटलः; 19B, ०पश्चिमसिंहा-सनन्नित्याविधान ऊनविंशतिपटलः; 20A, ०महासिंहासनेश्वरीडामरभैरवेश्वरी विंशति पटलः; ०चैतन्यभैरवी एकविंशतिपटलः; 20B, ०षट्कूटाभैरवी द्वाविंशति पटलः; ०षट्कूटाभैरवी त्रयोविंशति पटलः; 21A, ०अघोरभैरवी पञ्चविंशति पटलः; 21B, ०भैरवी नाम षड्विंशति पटलः; 22A, ०पञ्चसुन्दरी नाम सप्तविंशति पटलः; 23A, ०पारिजातेश्वरी वाण्यष्टाविंशति पटलः; ०पञ्चवाणेशी-यजनविधिरूनत्रिंशत् पटलः; 23B, ०पञ्चवाणेशीयजनविधिस्त्रिंशत् पटलः; 24A, ०कल्पलतायजन एकत्रिंशत् पटलः; 25B, ०श्रीमदन्नपूर्णाद्वात्रिंशत् पटलः;

29A, ०मातङ्गेश्वरीरत्नविद्यायजनत्रयस्त्रिंशत् पटलः; 30B, ०भुवनेश्वरी-त्रिगुणितसाधनचतुस्त्रिंशत् पटलः; 32A, ०भुवनेश्वरी षड्गुणितं यन्त्रसाधन पञ्चत्रिंशत् पटलः; 34A, ०भुवनेश्वरी द्वादशगुणितो षट्त्रिंशत् पटलः; 36B, ०घटार्गलसाधन सप्तत्रिंशत् पटलः; 39A, ०पञ्चमीक्रमार्चनविधिरष्टात्रिंशत् पटलः; 41A, ०पञ्चमीशकटे यन्त्रोद्धारप्रयोगसाधनविधिरूनत्रिंशत्(?) पटलः; 42A, ०आयतनानान्दो(?) विवरणं चत्वारिंशत् पटलः; 42B, ०कामेश्वरी-नित्याविवरणं नाम एकचत्वारिंशत् पटलः; 43B, भगमाला नित्याविवरणम् द्वाचत्वारिंशत् पटलः; 44B, ०त्रयश्चत्वारिंशत् पटलः; 45B, भेरुण्डानित्या-विवरणं चतुश्चत्वारिंशत् पटलः; 46A, ०वह्निवासिनीयजन पञ्चचत्वारिंशत् पटलः; 46B, ०महाविद्येश्वरीयजन षट्चत्वारिंशत् पटलः; 47A, ०शिवदूतीयजनविधिः सप्तचत्वारिंशत् पटलः; 48A, ०त्वरितायजनविधिरष्टचत्वारिंशत् पटलः; 48B, ०कुलसुन्दरीनित्यानित्यायजन ऊनपञ्चाशत् पटलः; ०नीलपताकिनीयजन पञ्चाशत् पटलः; 49B, ०विजयायजन एकपञ्चाशत् पटलः; 50A, ०सर्व्वमङ्गलायजन द्वापञ्चाशत् पटलः; 51A, ०ज्वालामालिनीयजन त्रिपञ्चाशत् पटलः; 51B, ०नित्याविवरणं नाम [चतुः]पञ्चाशत् पटलः; 53A, ०पञ्चपञ्चाशत् पटलः; 55B, ०करशुद्धा-विद्यावि[व]रणं नाम षट्पञ्चाशत् पटलः; 59B, ०श्रीविद्याविवरणं नाम सप्तपञ्चाशत् पटलः; 62B, ०विद्यान्यास-विद्याविवरणं नामाष्टापञ्चाश, पटलः; 66A, ०शिवशक्तिसम्वादे ध्यानादियजनं नाम नवपञ्चाशत् पटलः 70B, ०मदनारोपणनैमित्तिकाभिधानं नाम षष्टि पटलः।

6055.

4759.

Dakṣiṇāmūrtisaṃhitā.

Substance, country-made paper. $9\frac{1}{4} \times 4\frac{1}{2}$ inches. Folia, 2. Lines, 9 on a page. Extent in ślokas, 24. Character, Nāgara. Appearance, fresh. Incomplete.

This MS contains the sixth chapter of the work, but the number of the chapter is not indicated in the colophon.

6056.

5453. कुमारसंहिता । *Kumārasaṃhitā.*

Substance, country-made paper. 10×4 inches. Folia, 12. Lines, 9 per page. Extent in ślokas, 250. Character, Nāgara. Appearance, fresh. Complete in 10 chapters.

This is in the form of an interlocution between Brahmā and Śiva. It deals with the details of worship of Gaṇapati.

Ulwar 2028 Extr. 615 describes a MS of it in 7 chapters. Cat. Cat. (III. 24) refers to another MS of it in 10 chapters.

Beginning :—

श्रीगणेशाय नमः ।

समस्तायुधसंपूर्ण-षड्भुजद्वादशान्वितम् ।
अधस्तादनिताकारमाद्यं वन्दे गजाननम् ॥
रजताद्रिवरे रम्ये मुनिवृन्दनिषेविते ।
... ...
... ...
रत्नसिंहासनारूढं देव्या सह महेश्वरम् ।
द्रष्टुं समागतो ब्रह्मा प्रणिपत्य कृपानिधिम् ॥
बद्धाञ्जलिपुटो भूत्वा तुष्टाव परमेश्वरम् ।

ब्रह्मोवाच

... ...
... ...
... ...
महाविद्या महामाया देवी विश्वमयी किल ।
मायया निर्म्मितं विश्वं जगदेतच्चराचरम् ॥
इत्युक्तं भवता पूर्व्वं परब्रह्ममयीति च ।
तस्माद् विघ्नेश्वरं देवं श्रीविद्यासहितं परम् ॥

तन्मन्त्रयन्त्रतन्त्रादि पुरश्चरणलक्षणम् ।
सर्व्वं वदस्व कृपया पाहि मां भक्तवत्सल ॥

ईश्वर उवाच ।

शृणु ब्रह्मन् यथान्यायं विद्यागणपतेर्मनुम् ।
सर्व्वैश्वर्य्यप्रदं दिव्यं सर्व्वलोकविमोहनम् ॥

Colophons of the different chapters :—

2B, इति कुमारसंहितायां सदाशिवब्रह्मसंवादे विद्यागणेशमन्त्रोद्धारः प्रथमोऽध्यायः ।

4B, इति कुमारसंहितायां द्वितीयोऽध्यायः ।
[This chapter deals with Puraścaraṇa.]

5B, ०इति श्रीकौमारितन्त्रे तृतीयोऽध्यायः ।
[This chapter treats of Pūjā proper.]

6B, इति कुमारे चतुर्थोऽध्यायः ।
[This chapter treats of Pañcamācaraṇa.]

7A, इति कौमारसंहितायां वश्यादिप्रयोगः पञ्चमाध्यायः ।

8A, इति कुमारसंहितायां स्तम्भनोच्चाटनं नाम षष्ठोऽध्यायः ।

8B, ०होमविधिर्नाम सप्तमोऽध्यायः ।

10A, ०विद्यागणपतिकल्पे रहस्यागमे संग्रामविजयो नामाऽष्टमोऽध्यायः ।

11A, ०वाञ्छाकल्पलता नाम नवमोऽध्यायः ।

Last Colophon :—

इति कौमारसंहितारहस्यातिरहस्य-वाञ्छाकल्पलतामनुविधानं नाम दशमोऽध्यायः ।

6057.

5973. **चन्द्रहाससंहितायां चन्द्रज्ञानम् ।** *Candrajñānam from the Candrahāsasaṃhitā.*

Substance, country-made paper. $11\frac{3}{4} \times 6$ inches. Folia, 1–8. Lines, 9 to 12 on a page. Extent in ślokas, 225. Character, Nāgara. Appearance, old and discoloured. Complete.

This is in the form of an interlocution between Śiva and the moon. It contains a metaphysical discussion about the real nature of the various things of the world.

Beginning :—

श्रीगणेशाय नमः ।

ॐ स्वस्ति सिद्धम् । ... ...

ॐ नौमि स्वात्मप्रकाश-प्रशमित-विषमक्लेशराशिं महेशम्
वन्दे वाग्देवतां तां कलयति किल या मूला तां वाग्लतायाः ।
विघ्नग्रासप्रबन्धादिव बृहदुदरं स्तौमि विघ्नाधिराजम्
दत्तप्राग्दीक्षमेकं गुरुवरमपरं ज्ञानदञ्च प्रपद्ये ॥ १ ॥

ॐ कैलासपीठमध्यस्थं देवदेवं महेश्वरम् ।
ब्रह्मादिकारणैः सार्द्धं देवेशञ्च उमापतिम् ॥
महोरगसमायुक्तं अप्सरैः परिवारितम् ।
महाध्यानस्थितं देवं मुनिभिश्चापि संवृतम् ॥ २ ॥

... ...

... ... ॥ ३—५ ॥

तत्रस्थं देवदेवेशमुमया सहितं शिवम् ।
दृष्ट्वा तथाविधं देवं ध्यानासक्तं कपालिनम् ॥ ६ ॥
संशयाविष्टमनसः चन्द्रो वेदविदां पतिम् ।
अष्टाङ्गप्रणिपातेन प्राञ्जलिः प्रणतः शिरः ॥ ७ ॥
तदमानोऽब्रवीत् वाक्यं + + सन्तं पुनः पुनः ।
मूहूर्त्तमपि सञ्चिन्त्य इदं वचनमब्रवीत् ॥ ८ ॥
इन्द्रजालं हि पश्यामि इदं सत्यमसत्यता ।
मोहितं मायया सार्द्धं ब्रह्माण्डं सचराचरम् ॥ ९ ॥
देवमानुषतिर्य्यञ्चां गन्धर्व्वोरगरक्षसाम् ।
सर्व्वं देव महादेव प्रतिष्ठा बुद्धि मे मतिः ॥ १० ॥
क्षणिकस्य तु रूपस्य तथा शब्दस्य वै प्रभो ।
अयुक्तस्यैव मन्त्रस्य ध्वनिद्रष्टस्य नित्यशः ॥ ११ ॥

आकारस्य कथं देव प्रणमन्ति च नित्यशः ।
स्वयमेव तु यो नष्टो यस्तु चित्तेन कल्पितः ॥
शब्दस्य क्व [च] तस्यैव मन्त्रत्वमपि बुध्यते ॥ १२ ॥
प्रयुक्तमथ वीणा यं तन्त्रीस्वरसमन्वितम् ।
चित्तेन साध्यते तस्य षड्जमध्यमधै(दै)वतम् ॥ १३ ॥
तथा मंत्रा[:] तथाकारा विद्या चैव सहस्रशः ।
अप्रबुद्धधियो मूढाः स्वचित्ता च बहि[:] स्थिताः ॥ १४ ॥
वृत्ति[:] केनैव सन्तुष्टा भ्रामिता च त्वया पुरः ।
असत्यमिन्द्रजालञ्च यद्रूपं सकलं प्रभो ॥ १५ ॥
उच्चार्य्यमाना ये मन्त्रा न मन्त्रा चापि ये विदुः ।
मोहिता देवगन्धर्व्वा मिथ्याज्ञानेन गर्व्वितः ॥ १६ ॥
मायाः स्वप्नोपमाः सर्व्वे सुप्ताध्यान च धारणाः ।
न तच्चित्रमिदं सत्यं शास्त्रजालं क्रियागमम् ॥ १७ ॥

सोम उवाच ।

देव्या विनायकस्यैव षन्मुखस्य त्रिलोचन ।
नंदिभृंगिमहाकाल-कुवेरशक्रयोस्तथा ॥ १८ ॥
वासुकिश्च गरुत्मांश्च तथा नारायणस्य वै ।
सनत्कुमारप्रमुख-ऋषीणां भावितात्मनाम् ॥ १९ ॥
दुर्व्वास[स]प्रमुखा ये शास्त्रे या च संहिताः ।
मन्त्राश्च विविधाकारा विद्याश्चापि सहस्रशः ॥ २० ॥
कथितं तु त्वया सर्व्वं तेषां चैव समासतः ।
तानि सर्व्वाणि देवेश शिरःस्थेन मया श्रुतम् ॥ २१ ॥
भ्रामिताश्च त्वया सर्व्वे व्यायामेन महेश्वर ।
नाख्यातं कस्य चेज्ज्ञानं शारीरं गूढगोचरम् ॥ २२ ॥
अप्रबुद्धाश्च ते सर्व्वे भ्रामिताः शास्त्रपाठके ।
नास्ति त्वत्सदृशो धूर्त्तो वाग्जाले बुद्धिनाशनः ॥ २३ ॥
तन्त्रे तन्त्रे [त्व]या प्रोक्तं मया प्रत्यक्षतः श्रुतम् ।
शपथानि असंख्यानि मिथ्या देव त्वया कृताः ॥ २४ ॥

नैव कस्यापि (स)सद्भावं मोहितास्ते त्वया प्रभो ।
रञ्जितास्ते त्वया व्यायामे मिथ्याज्ञानेन गर्व्विता[ः] ॥ २५ ॥
अप्रबुद्धधियः सर्व्वे तेऽपि मूढत्वतां गताः ।
मिथ्याज्ञानेन संतप्ता मिथ्याशास्त्रेण गर्व्विताः ॥ २६ ॥
साकारस्य क्षयं चास्ति मन्त्रोच्चारे क्षयं पुनः ।
क्षणिका तु क्रिया देव जन्मापि मरणं तथा ॥ २७ ॥
कस्य जन्म मृतः को वा दह्यते वाच कः प्रभो ।
पिंजं तु कस्य वा देव कुतः श्राद्धं कुतः क्रिया ॥ २८ ॥
प्रत्यक्षे बान्धवानां स्वस्थाने यत्प्रलीयते ।
पार्थिवे पार्थिवं तत्त्वं वायौ (वार्योर्वायुर्ग) वायुगतं तथा ॥ २९ ॥
आपश्चाप्सु च वै लीनास्तेजास्तेजसि विश्वति ।
आकाशे तु तथाकाशं मनोबुद्धिरहं तथा ॥ ३० ॥
यथागताः पुनस्तत्र लीनाः स्वप्ने समं ततः ।
अमूर्त्तो भगवान् जीवो निर्गुणो विरजः खगः ॥ ३१ ॥
इन्द्रियाश्च गुणाः सर्व्वे स्वे स्वे स्थाने प्रलीयते ।
कायं मांसमयं देव दाहश्च कृतवान् प्रभो ॥ ३२ ॥
किं भ्रमन्ति जडा मूढा अज्ञानव[ि]धरीकृताः ।
किं मांसं किञ्च वास्थीनि रुधिरं श्लेष्ममेव च ॥ ३३ ॥
धातुत्रयं वै देव तथा मेदस्तथा वसा ।
अन्त्राणि हृदयो वाथ आमं मू+ तथा कफम् ॥ ३४ ॥
रेतो वा श्लेष्ममूत्रे वा पुरीषं चर्म्मनालयः ।
मज्जां वापि नखाश्चैव रोमाः शृतशस्तथा ॥ ३५ ॥
कर्णौ दन्तौ च नासा च जिह्वाङ्गुष्ठौ च वाक् तथा ।
चक्षुर्वा घण्टिका वापि ग्रीवा वापि सुरोत्तम ॥ ३६ ॥
बाहू हस्तौ तथा चैव उदरं कटिमेढ्रकम् ।
स्फिजे जंघा च पादौ च वाचा सा कृतवान् प्रभो ॥ ३७ ॥
नाम वापि तथा देव गोत्रं वर्णं तथैव च ।
रोमाणि नाडयश्चैवावयवश्च तथा प्रभो ॥ ३८ ॥

एभ्यो मध्याद् विरूपाक्ष कोऽसौ चैव मृतः प्रभो ।
कस्य श्राद्धं क्रियाकाण्डं पिण्डदानादिकञ्च यत् ॥ ३९ ॥
जीवो ह्यनादिरमलः स्वरूपी खेचरः परः ।
न रूपं न च वा वर्णं न स्थानं न च धारणा ॥ ४० ॥
ये ये भावाः शरीरस्य ते सर्व्वे स्वपुरं गताः ।
कस्य कालं यमं कस्य भटाश्चैव सुदारुणाः ॥ ४१ ॥
नरकाः शासनाश्चैव प्रेतपुर्य्य[ां] वसेत्तु कः ।
एको यदि भवेत् कालमेकः पाशं भवेच्च सः ॥ ४२ ॥
सहस्राश्चासंख्याताः आहवेन हताः प्रभो ।
तत्र कालाश्च बहवो ह्येको वापि कथं प्रभो ॥ ४३ ॥
शकुन्यो विह्वलीभूता निर्गता विलयं गताः ।
ल(ख्या)च्छ्याश्च संख्यासंख्यानि तत्र काला[ः] किमागताः ॥ ४४ ॥
बह्वाश्चापि एको वा सहस्राः चैव तस्य वै ।
मशकानि असंख्यानि मत्स्याश्चैव सहस्रशः ॥ ४५ ॥
एककालप्रनष्टाश्च तत्र कालाः किमागताः ।
एककालो बहून् वापि ग्रसते वापि नीयते ॥ ४६ ॥
स्कन्धे वा बाऊपृष्ठे वा स कथं नीयते प्रभो ।
एतत् सर्व्वं समासेन सर्व्वं भैरव तत्त्वतः ॥ ४७ ॥

End :—

मद्वाक्ये ज्ञानभागी स्यात् पूर्व्वोक्तस्तत्र वै तु सः ।
महाभागी भविष्यति एतन्मे वदतो वरः ॥ १७३ ॥
एवमुक्त्वा महादेवो गतोऽन्तर्धानमीश्वरः ।
चन्द्रेण प्राप्तं विज्ञानं कृतकृत्यो यथार्थतः ॥ १७४ ॥
ए[त]च्छास्त्रं न वक्तव्यं यस्य कस्य समीपतः ।
अभक्ते नैव दातव्यं अश्रद्धे नैव दीयते ॥ १७५ ॥
यो मोहाद्दीयते ज्ञानमपरीक्ष्य च मन्दधीः ।
नासौ ज्ञानस्य भागी स्याज्जन्मान्तरशतैरपि ॥ १७६ ॥

यो निन्दयति मोहेन इदं शास्त्रमगौरवात् ।
स याति नरकं घोर[ं] यावदाभूमिसंप्लवम् ॥ १७७ ॥

Colophon :—

इति परमरहस्ये चन्द्रहाससंहितायां चन्द्रज्ञानं समाप्तम् ।

6058.

11068. **महाकालसंहितायां षोडशपात्रम् ।** *Ṣoḍaśapātra from the Mahākālasaṃhitā.*

Substance, country-made paper. 7 × 4 inches. Folia, 7. Lines, 7 on a page. Extent in ślokas, 40. Character, modern Nāgara. Appearance, fresh. Complete.

2A, फेत्कारिणीतन्त्र ; मत्स्यसूक्त ; 2B, तत्त्वबोध, तन्त्रचूड़ामणि ; 3A, तारार्णव ; ब्रह्मसंहिता ; 3B, भावचूड़ामणि ; 4A, महाकपिलपञ्चरात्र ; तत्त्वसार, वाराहीतन्त्र, षोड़शार्णव, वीरागम ; 4A, शिवपद्धति ; 4B, हयशीर्ष-पञ्चरात्र, मोहशूरोत्तर ; 4B, सिद्धजामल, नारदपञ्चरात्र ; 5A, ज्ञानोन्नयन, योगिनीतन्त्र ; 5B, वैशम्पायनसंहिता ; 5B, चन्द्रपीठ, कुलार्णव ; 6B, प्रपञ्चसार ; शैवागम ; 7A, देवीजामाल, याज्ञवल्क्यसंहिता ; शारदा, सौत्रा-मणितन्त्र, कुलमूलावतार ; 7B, आगमकल्पद्रुम ; श्रीकण्ठसंहिता ; 8A, सिद्धान्तशेखर ; क्रियाकाण्डशेखर, गौतमीतन्त्र ; अगस्तिसंहिता ; 8B, सार-संग्रह ; कालोत्तर ; रुद्रजामल ; तत्त्वसारसंहिता, रत्नावली ; 9A, नीलतन्त्र ; 9B, विष्णुजामल ; समयातन्त्र ; 10A, वाराहीतन्त्र ; महोग्रताराकल्प, वीर-चूड़ामणि ; मृडानीतन्त्र, महाहारकतन्त्र ; 10B, प्रयोगसार, प्रपञ्च ; 12A, कादिमत, हयशीर्षपञ्चरात्र ; दिव्यसारस्वत ; 15B, सिद्धान्तशेखर ; 18B, गणेशविमर्षिणी ; पिङ्गलामत ; 19A, वायवीयसंहिता ; क्रियासार ; योगिनी-हृदय, वशिष्ठसंहिता ; 19B, त्रैलोक्यसार ; पिङ्गलामत ; 20A, वायवीय-संहिता ; 20B, फेत्कारिणी ; 22A, सारस्वतमत ; 25A, वशिष्ठसंहिता ; 26B, आगमसिद्धान्त ; 28B, अत्रि ; उड्डीश ; 29A, त्रिपुरासारसमुच्चय, जामल ;

राघवभट्ट, वीरचूड़ामणि ; 30A, कात्यायन ; 33A, गणेश्वरविमर्षिणी ; 33B, त्रिपुरासार ; 35B, नारायणीय ; 36B, दीपिका ; तन्त्रराज, 37B, दक्षिणा-मूर्त्तिसंहिता ; 39A, सारसंग्रह, त्रिशक्तिरत्न, 39A, तन्त्रशेखर ; 40B, समयाचार, भैरवतन्त्र, सारसंग्रह ; 41A, स्वच्छन्दभैरवतन्त्र ।

6325.

379. *Tārābhaktisudhārṇava.*

Substance, country-made yellow paper. 18 × 4 inches. Folia, 5–8. Lines, 7, 8. Extent in ślokas, 120. Character, Bengali. Appearance, fresh. Fragment.

This portion which is without any colophon, but which contains the name on the left-hand margin of every leaf, does not form part of the first four chapters which are found in the foregoing MS of the work. It contains a part of a later section dealing with the worship of Kālī.

Jagannātha Bhaṭṭācārya.

6326.

6537. तारार्चनचन्द्रिका । *Tārārcanacandrikā.*

Substance, country-made paper. 12½ × 5¾ inches. Folia, 26. Lines, 9. Extent in ślokas, 450. Character, Nāgara. Appearance, fresh. Complete.

The work describes in detail the procedure of the worship of the deity beginning with the morning rites to be performed by the worshipper.

Beginning :—

श्रीगणेशाय नमः ।

साधको ब्राह्मे मुहूर्त्ते उत्थाय मुक्तस्वापः सहस्रदलकमलावस्थितं नीलवर्णद्विभुजं वरदाभयकरं नीलमाल्यानुलेपनं नीलाम्बरं शङ्खादि-भूषिततनुमुदितं द्विनेत्रं स्वप्रकाशरूपं वामाङ्कस्थितनीलशक्तिं पञ्चोपचारैर्मानसैराराध्य नमस्कुर्य्यात् ।

नीलाम्बरं नीलविलेपयुक्तं
शङ्खादिभूषिततनुं मुदितं द्विनेत्रम् ।
वामाङ्कपीठे स्थितनीलशक्तिं
वन्दामि वीरं करुणानिधानम् ॥

... ...

प्रातर्ध्यानम् ।

खर्व्वां नीलविशालाक्षीं पञ्चमुद्राविभूषिताम् ।
कपालकर्त्तृकाहस्तां खड्गेन्दीवरधारिणीम् ॥
व्यालमालाजटाजूटां पीनोन्नतपयोधराम् ।
नवयौवनसम्पन्नां मदाघूर्णितलोचनाम् ॥
एवं ध्यात्वा महादेवीं सर्व्वज्ञः साधको भवेत् ॥

Colophon :—

इति श्रीजगन्नाथभट्टाचार्य्यविरचिता तारार्चनचन्द्रिका समाप्ता ।

Post-colophon Statement :—

श्रीशुभं । श्रीराम ।

मालवीयबालमुकुन्दस्येदं पुस्तकम् ।

Vāsudeva Kavikaṅkaṇa Cakravartī.

6327.

790. ताराविलासोदयः । *Tārāvilāsodaya.*

Substance, country-made paper. 14 × 3½ inches. Folia, 47. Lines, 6–7. Extent in ślokas, 900. Character, Bengali. Date, Ś.E. 1620. Appearance, old and faded. Complete in ten ullāsas but for two folia (30, 31) missing.

The present MS is described in L. IV. 1602. Another MS of the work is described in CS. V. 30. The work deals with details of the worship of Tārā.

After the *maṅgalācaraṇa* verse quoted in L., the work runs:—

चीनक्रमोल्लसिततन्त्रपयोधिमध्यात्
उद्धृत्य चारुवचनानि विचारपूर्व्वम् ।
ताराविलासमुदयान्तममुं प्रचक्रे
श्रीवासुदेवकविकङ्कणचक्रवर्त्ती ॥
कैलासे शिवमासीनं चन्द्रखण्डविभूषितम् ।
वक्षःस्थले समासीना पृच्छति स्म नगात्मजा ॥
कथमीशान सर्व्वज्ञ भवतस्ते तपोधनाः ।
तां विद्यां प्राप्य कवयो भारतादि प्रचक्रिरे ॥
श्रुत्वा नगात्मजावाक्यं प्रहस्य परमेश्वरः ।
प्राह प्रियां परिश्रत्य साधु साध्विति पूजयन् ॥
शृणु साध्वि महाविद्यामज्ञानेन्धनदाहिनीम् ।
यामवाप्य महात्मानो धर्म्मकामार्थमुक्तिषु ॥
नासाध्यं मेनिरे किञ्चित् कवयः शुद्धबुद्धयः ।

Post-colophon Statement:—

शकाब्दाः १६२० फाल्गुन कृष्णा पञ्चमी बुधवारे एकादशदिवसे समाप्ता पुस्तिकेयं ।

6328.

3455. *Tārāvilāsodaya.*

Substance, country-made paper. $16\frac{1}{2} \times 3\frac{1}{4}$ inches. Folia, 12–35 (as marked on the right-hand side) and 26–49 and 1–24 (as marked on the left-hand side). Lines, 7. Extent in ślokas, 700. Character, Bengali. Incomplete.

This MS runs up to the end of the eighth chapter covering up to Fol. 39B of the previous MS.

From the folio marks the present MS appears to be a part of a larger MS.

On the reverse of the last leaf there is a section on the worship of the Ganges quoted from the *Āgamakalpa*. This section begins as follows:—

अथ गङ्गामनुं वक्ष्ये लोकत्रयफलप्रदम् ।
यस्याः स्मरणमात्रेण सर्व्वपापैः प्रमुच्यते ॥
तारदीर्घेन्दुशाङ्गी ङेन्तां गङ्गां समुद्धरेत् ।
विश्वमुख्या ङेयुता च ङेन्ता शिवामृता भवेत् ॥

The colophon of this section:—

इत्यागमकल्पे चतुर्थशाखायां तृतीयः पटलः ।

Rāmakṛti.

6329.

4267. तारार्चनतरङ्गिणी । *Tārārcanataraṅgiṇī.*

Substance, palm-leaf. 12×1 inches. Folia, 47. Lines, 5. Extent in ślokas, 1,100. Character, Uḍiyā. Appearance, fresh. Incomplete.

The present MS contains the first three chapters of the work and a portion of the fourth, all dealing with the details of the worship of Tārā.

Beginning:—

श्रीगणेशाय नमः ।

आनन्दमधुसन्दोहं सन्मनोमधुपाकुलम् ।
तारिणीचरणाम्भोजयुगलं समुपास्महे ॥
श्रीगुरोश्चरणद्वन्द्वमत्तविन्दू मनीषिणा ।
क्रियते रामकृतिना तारार्चनतरङ्गिणी ॥

तत्रादौ मन्त्राः ।

फेत्कारिणीतन्त्रे ।

प्रथमं सपरं दत्त्वा चतुर्थस्वरभूषितम् ।
रेफाङ्कितं स्फुरद्दीप्तिमिन्दुविन्दुसमन्वितम् ॥

Colophons of the different chapters :—

2A, इति श्रीतारार्चनतरङ्गिण्यां मन्त्रोद्धारो नाम प्रथमस्तरङ्गः ; 8A, ०प्रातःकृत्यादिविधिर्द्वितीयस्तरङ्गः ; 46B, ०नित्यपूजाविधिस्तृतीयस्तरङ्गः ।

Kāśīnātha.

6330.

6540. तारापूजारसायनम् । *Tārāpūjārasāyana.*

Substance, country-made paper. 13 × 5¼ inches. Folia, 13. Lines, 9. Extent in ślokas, 280. Character, Nāgara. Date, Saṃvat 1961. Appearance, fresh. Complete.

It lays down the procedure of the worship of Tārā, beginning with a description of the morning rites of the worshipper.

Beginning :—

श्रीगणेशाय नमः । श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः ।
या विद्येत्यभिधीयते श्रुतिपथे शक्तिः सदाद्या परा
सर्व्वज्ञा भवबन्धभीतिनिपुणा सर्व्वाशये संस्थिता ।
दुर्ज्ञेया सुदुरात्मभिश्च मुनिभिर्ध्यानास्पदं प्रापिता
प्रत्यक्षा भवतीह सा भगवती बुद्धिप्रदा मेऽस्तु वै ॥
नानातन्त्राणि विज्ञाय जयरामपितुर्मुखात् ।
करोति काशीनाथोयं तारापूजारसायनम् ॥

तत्र श्रीमान् साधकेन्द्रो ब्राह्मे मुहूर्त्ते चोत्थाय रात्रिवाससी परित्यज्य वासोत्तरं परिधाय सशिरसि सहस्रारे कमले निजगुरुं ध्यायेत् ।

प्रातः शिरसि शुक्लेऽब्जे द्विनेत्रं द्विभुजं गुरुं ।
वराभयकरं शान्तं संस्मरेन्नामपूर्व्वकमिति ॥

Works quoted and referred to :—

10B, शक्तिसङ्गमतन्त्र ; 11A, वृहत्तन्त्रराज ; 12B, पुरश्चरणदीपिका ।

Colophon :—

इति श्रीमत्श्रुतिस्मृतिमतप्रमाण-पारावारपारीण-सर्व्वतन्त्र-दक्षिणाचारतन्त्रधुरीणदक्षिणामूर्त्तिचरणारविन्दमिलिन्देन जयराम-भट्टभडात्मजकाशीनाथेन विरचितं तारापूजारसायनं पुण्यग्रामे समाप्तम् ।

Post-colophon Statement :—

शुभं भौः श्रावन वदी ११ संवत् १९६१ । मालवीयबालमुकुन्द-स्येदं पुस्तकम् ॥

Anonymous.

6331.

5882A. [तारापञ्चाङ्गम् । *Tārāpañcāṅga.*]

Substance, country-made paper. $8\frac{3}{4} \times 6$ inches. Folia, 56. Lines, 9, 10, 11. Extent in ślokas, 1,300. Character, Nāgara. Appearance, new. Complete.

This contains a number of hymns to Tārā and descriptions of several rites in connection with the worship of the deity. A short description of the contents is given below.

I. Thousand names of Tārā (Fol. 1–15A):

Beginning :—

श्रीगणेशाय नमः । ॐ नमो देव्यै ।

कैलासशिखरे देवं महादेवं महेश्वरम् ।
भवानी रहसि प्रीत्या पप्रच्छ वरदायकम् ॥

देव्युवाच ।

कथमीशान सर्व्वज्ञ लभन्ते सिद्धिमुत्तमां ।
साधकाः सर्वदा येन तन्मे कथय सुप्रभो ॥

शिव उवाच ।

विना पूजां विना ध्यानं विना जापं विना बलिं ।
लभन्ते येन कल्याणं तन्मे निगदतः शृणु ॥
नाम्नां सहस्रं तारायाः कथयिष्याम्यशेषतः ।
शृणु देवि सदा भक्त्या भक्तानां परमं हितम् ॥
... ...
... ...
ॐ तारा रात्रिर्महारात्रिः कालरात्रिः कपालिनी ।
कालिका कामदा माया महामाया महोत्सवा ॥

Colophon :—

इति नीलतन्त्रे भक्तिकुलसर्व्वस्वसहस्रनामाख्यं स्तोत्रं समाप्तम् ।

II. Thousand names of Tārā, each beginning with the letter त (Fol. 15A–33A):

Beginning :—

अथ ब्रह्मयामलोक्ततारायास्तकारादिसहस्रनाम यथा ।

वशिष्ठ उवाच ।

नाम्नां सहस्रं तारायाः मुखाम्भोजाद्विनिर्गता ।
मन्त्रसिद्धिकरं प्रोक्तं तन्मे वद पितामह ॥

ब्रह्मोवाच ।

शृणु विप्र प्रवक्ष्यामि रहस्यं सर्व्वसिद्धिदं ।
यस्योपदेशमात्रेण तव सिद्धिर्भविष्यति ॥
महाप्रलयकालादौ नष्टे स्थावरजङ्गमे ।
हाहाकारं समाकर्ण्य कृपया संहृतं तनौ ॥

नाम्ना तेन समाख्याता तारा तारणरूपिणी ।
महाशून्यालयं कृत्वा तत्रैकाकिनी स्थिता ॥
पुनः सृष्टेश्च वर्षा तु दिव्यसाम्राज्यदायकम् ।
नाम्नां सहस्रं तस्यास्तु तकाराद्यं तया स्मृतम् ॥
तत्प्रभावेण ब्रह्माण्डं निर्म्मितं सुदृढं महत् ।
... ...

अथ सहस्रनाम तारायाः ।

तारा तारादिपञ्चार्णा ताराद्या वेदबीजिता ।
तारा स्वरहिता त्वर्णा ताराद्या तारारूपिणी ॥

Colophon :—

इति ब्रह्मयामलोक्ततारादि सम्पूर्णम् ।

III. Successful application of *mantras* (Fol. 33B-36A):

Beginning :—

मन्त्ररत्नाकरे । मन्त्रसिद्धेरुपायमाह । गौतमीये ।

सम्यगनुष्ठितो मन्त्रो यदि सिद्धिर्न जायते ।
पुनस्तेनैव कर्तव्यं ततः सिद्धो भवेद् ध्रुवम् ॥
पुनरनुष्ठितो मन्त्रो यदि सिद्धिर्न जायते ।
पुनस्तेनैव कर्तव्यं ततः सिद्धो न संशयः ॥

The indications of the attainment of success in the application of *mantras* are given thus (Fol. 35A):—

अथ मन्त्रसिद्धिलक्षणम् ।

मनोरथानामक्लेशसिद्धिर्लक्षणमुत्तमम् ।
मृत्यूनां हरणं तद्वद्देवतादर्शनं तथा ॥
प्रयोगस्याक्लेशसिद्धिः सिद्धेस्तु लक्षणं परम् ।
परकायप्रवेशश्च पुरःप्रवेशनं तथा ॥

IV. Details of Homa (Fol. 36A–41A):

Beginning :—

शारदातिलके हवनविधि[:] । कुण्डप्रकारः । अथ कुण्डविधिः ।
यथा हवनं तथा कुण्डम् ।

यावत् कुण्डस्य विस्तारः खननं ता[व]दीरितम् ।
कुण्डानां यादृशं रूपं मेखलानाञ्च तादृशम् ॥
कुण्डानां मेखलास्तिस्रो मुष्टिमात्रं तु ताः क्रमात् ।
उत्सेधायामतो ज्ञेया ह्येकार्धाङ्गुलिसंमिताः ॥

Colophons :—

36B, इति ताराभक्तिसुधार्णवोक्त-सामान्यहोमविधिः समाप्तः ; 41A, इति शारदातिलके कुण्डविधिः समाप्तः । तन्त्रसारे कुंडविधिरिदमेव प्रकारः । भिन्नो नास्ति ॥

V. Tārāpaṭala (Fol. 41A–44B):

Beginning :—

देव्युवाच ।
भगवन् देवदेवेश देवलोकेश शङ्कर ।
या पुरा सूचिता विद्या सार्धपञ्चाक्षरी परा ॥
नामाद्यपरमां विद्यां श्रोतुमिच्छामि तत्त्वतः ।
कथयस्व महादेव यद्यहं प्रेयसी तव ॥

Colophon :—

इति श्रीरुद्रयामलीयतन्त्रे तारारहस्ये तारापटलं सम्पूर्णम् ।

VI. A hymn to Tārā (Fol. 44B–45B):

Beginning :—

ॐ घोररूपे महारावे सर्व्वशत्रुक्षयङ्करि ।
भक्तेभ्यो वरदे देवि त्राहि मां शरणागतम् ॥

Colophon :—

इति रुद्रयामले तारिण्याः स्तोत्रं संपूर्णमस्तु । श्रीउग्रतारार्पणमस्तु ।

VII. A *kavaca* of Tārā (Fol. 45B–47B):

Colophon :—

इति श्रीयोगिनीतन्त्रे ताराकवचं समाप्तम् ।

VIII. A hymn to Tārā (Fol. 47B–50A):

Beginning :—

प्रकटविकटदंष्ट्रा घोररूपाट्टहासा
नरशिरकृतमाला मेघवर्णातिखर्व्वा ।
त्रिभुवनजयदात्री हस्तविन्यस्तकर्त्री
करविहितकपाला पातु मामुग्रतारा ॥

Colophon :—

इति शिवशासनरहस्ये तारास्तवराजस्तोत्रं संपूर्णम् ।

IX. Description of the procedure for the rites *bhūśuddhi*, *bhūtaśuddhi* and *prāṇapratiṣṭhā* (Fol. 50B–56A):

Beginning :—

सुमुखश्चैक० इत्यादिस्मरणं कृत्वा सकलशरीरशुद्ध्यर्थे भूशुद्धि-भूतशुद्धि-प्राणप्रतिष्ठान्तर्मातृकाबहिर्मातृकान्यासांश्च करिष्ये ।

Colophons :—

54A, इति भूतशुद्धिः ; 56A, इति प्राणप्रतिष्ठा ।

6332.

5830. [उग्तारापञ्चाङ्गम् । *Ugratārāpañcāṅga.*]

Substance, country-made paper. $11\frac{1}{2} \times 6$ inches. Folia, 21. Lines, 10. Extent in ślokas, 420. Character, Nāgara. Date, Saṃvat, 1956. Appearance, fresh. Complete.

This contains details of the worship of Ugratārā and a number of hymns to the deity, all stated to be taken from the *Rudrayāmala* though the *nityapūjāpaddhati* portion is in prose like ordinary manuals of worship.

Beginning :—

श्रीगणेशाय नमः । श्रीउग्रतारायै नमः ।

श्रीदेव्युवाच ।

देवदेव जगन्नाथ निःशेषकरुणानिधे ।
पुरा त्वया वरो दत्तः तं दातुं मे क्षमो भव ॥

भैरव उवाच ।

पुरा सत्यं वरो दत्तो मया पर्व्वतनन्दिनि ।
दास्यामि परमप्रीत्या वरं वरय सुव्रते ॥

देव्युवाच ।

देव देवीति या प्रोक्ता जगच्चैतन्यरूपिणी ।
उग्रतारेति या नाम्ना सृष्टिस्थितिलयात्मिका ॥
वद तस्यास्तु पञ्चाङ्गं वरमेतं प्रयच्छ मे ॥

भैरव उवाच ।

शृणु देवि प्रवक्ष्यामि तारापञ्चाङ्गमुत्तमम् ।
यस्य कस्य न दातव्यं गोपनीयं प्रयत्नतः ॥

Colophons :—

3A, इति श्रीरुद्रयामले तन्त्रे उग्रतारापटलं सम्पूर्णम् ।

9B, ०उग्रतारानित्यपूजापद्धतिः सम्पूर्णा ।

10B, ०उग्रताराकवचं सम्पूर्णम् ।

19B, ०कुलसर्व्वस्वे उग्रतारासहस्रनाम स्तवः सम्पूर्णः । [The beginning agrees with that of Thousand Names of Tārā described in the previous MS (Fol. 1–3B, vers. 1–31).]

21A, ॰देवीभैरवसंवादे कुलसर्व्वस्वे श्रीउग्रतारास्तवः सम्पूर्णः समाप्तः। श्रीउग्रतारापञ्चाङ्गं सम्पूर्णम्।

Post-colophon Statement :—

श्रीः। संवत् १९५६ मिति चइत वदी ५ वार शनिचरके श्रीराम।

6333.

5886. तारापद्धतिः। *Tārāpaddhati.*

Substance, country-made paper. 9½ × 6 inches. Folia, 49. Lines, 9. Extent in ślokas, 600. Character, Nāgara. Appearance, discoloured. Complete.

This lays down the procedure of the worship of Tārā.

Beginning :—

अथ तारापद्धतिः।

तारे महिमापारे तारय तारय भवाम्बुधिं मातः।
हृदयसरोजे यै + + तव पदपद्मं सदा ध्यातम्॥
अथार्चापद्धतिं वक्ष्ये संक्षेपविधिबोधितां।
पश्यूनामियमेव स्याद्दिना लिपिशितादिभिः॥
अथ ब्राह्मे मुहूर्त्ते समुत्थाय निद्रां रात्रिवासं च हित्वा

A *Guruṣoḍaśīstuti* from the *Bālāvilāsa Mahātantra* is quoted on Fol. 4B.

6334.

3399. तारापूजाप्रयोगः। *Tārāpūjāprayoga.*

Substance, country-made paper. 14½ × 3 inches. Folia, 4. Lines, 8. Character, Bengali. Appearance, discoloured and worn out. Incomplete at the end.

This is a work of the same type as the above.

Beginning:—

अथ तारापूजाप्रयोगः ।

तत्रादौ मन्त्राचमनम् । मूलमन्त्रेण त्रिराचम्य जलं पीत्वा स्त्रीँ हूँ इति ओष्ठौ द्विरुन्मृज्य फट् इति करं क्षालयेत् । ॐ वैरोचनाय इति मुखं स्पृशेत् । ॐ शङ्खपाण्डराय नमः ॐ पद्मनाभाय नमः इति नसोः ।

(3) TRIPURĀ.

Nāgabhaṭṭa.

6335.

5023A. त्रिपुरासारसमुच्चयः । *Tripurāsārasamuccaya.*

Substance, palm-leaf. 16 × 1½ inches. Folia, 61. Lines, 3. Extent in ślokas, 900. Character, Bengali. Appearance, fresh. Incomplete.

The text is accompanied by the commentary of Govinda Śarman (Fol. 29–61).

The name of the author is given as Bhaṭṭanāga in some MSS (Mad. XII. 5651ff). The text, along with the commentary, has been printed in the *Vividhatantrasaṃgraha* of Rasikmohan Chatterji. The present MS contains the text and commentary of chapters 3–6 inclusive. The introductory portion of the commentary containing the *maṅgalācaraṇa* and the name of the commentator is also given here. After this introductory portion the commentary on the third chapter begins with the following words:—

अथ तृतीयपटलावधिटीका लिख्यते ।

6336.

11270. *Tripurāsārasamuccaya.*

Substance, country-made paper. 8½ × 2¾ inches. Folia, 2–71. Lines, 4, 5. Extent in ślokas, 700. Character, Newari. Date, 834 N.S. Appearance, fresh. Incomplete.

Complete but for the first Fol. The name of the author is given in the colophons as Bhaṭṭa Nāga.

Post-colophon Statement :—

सम्वत् ८३४ । ज्यष्ठ मासे शुक्लपक्षद्वतीयां तिथौ बुधवा...
रामभद्रसे पुत्र अनन्तभद्रसे + षते ।

6337.

224. *Commentary on Tripurāsāra by Govinda Śarman.*

Substance, country-made yellow paper. 16 × 4 inches. Folia, 40. Lines, 7. Extent in ślokas, 1,000. Character, Bengali. Appearance, old. Complete in ten chapters.

The present MS has been described in L. I. 482.

Mādhavānandanātha.

6338.

11335. सौभाग्यकल्पद्रुमः । *Saubhāgyakalpadruma.*

Substance, country-made paper. 10¼ × 4½ inches. Pages, 1–131. Lines, 7-8. Extent in ślokas, 700. Date, Saṃvat 1901 (?). Character, Nāgara. Appearance, fresh. Incomplete.

The MS contains the whole of the second part of the work dealing with the details of daily worship.

Beginning :—

ॐ खर्वं स्थूलतनुं गजेन्द्रवदनं लम्बोदरं सुन्दरम् ।
... ...
नित्यपूजाविधानेन पूजिता या प्रयच्छति ।
वाञ्छितार्थं पूजकेभ्यस्तामम्बां प्रणमाम्यहम् ॥

अथैवं कृतसन्ध्यादिक्रियः सपर्यामारभेत् । सा च त्रिधा नित्य-नैमित्तिककाम्यभेदात् । तत्र नित्यां निर्वर्त्य नैमित्तिकादिसपर्यां कुर्यात् । अतः आदौ नित्यसपर्याविधिरालिख्यते ।

End :—

अत्र अनुक्तानां दोषाणां त्रिधा पादुकास्मरणमिति शिवम् ।
श्रीमाधवानन्दनाथकृते सौभाग्यपूर्वके ।
कल्पद्रुमे ह्यभूत् स्कन्धो नित्यपूजाफलानतः ॥

Colophon :—

इति श्रीसौभाग्यकल्पद्रुमे द्वितीयः स्कन्धः ।

Post-colophon Statement :—

शां ६६७१ ।

रसरुतिमुनीन्द्रैः प्राप्तये जुक्तचन्द्रैः ।
संक्रान्तौ चन्द्रवारे भद्रयां इन्द्रियोगे ॥
यं दुःखनन्दचन्द्रैः सम्बत्सरैर्वा ।
चैत्रादिमासगत चतुः सम्पूर्ण[ः] शुक्लपक्षे ॥ १९०१ ॥
... ...

Kṣemānandanātha.

6339.

10005. सौभाग्यकल्पलतिका । *Saubhāgyakalpalatikā.*

Substance, country-made paper. 9 × 4½ inches. Folia, (1) 1–31, (2) 1–13, (3) 1–28. Lines, 12, 11 and 9. Character, Nāgara. Appearance, fresh. Incomplete.

This deals with the details of the worship of Tripurā. One MS of the work is referred to in *Cat. Cat.* (I, p. 738). The present MS contains seven chapters and a few lines of the eighth chapter.

Beginning :—

श्रीगणेशाय नमः ।

अथ सौभाग्यकल्पलतिकाप्रारम्भः ।

नमामि चिन्मयीं स्वात्मामर्शानन्दशरीरिणीं ।
त्रिपुरां त्रिपुरेशानीं पराहंभावरूपिणीम् ॥
नत्वाम्बिकापादपद्मद्वन्द्वं द्वन्द्वनिवर्त्तकं ।
विघ्नौघघ्नं च गणपं देवीं वाचं सरस्वतीं ॥
महागुरून् माधवाख्यान् कल्पद्रुमपयोर्णवान् ।
शिवानन्दाख्ययोगीन्द्रान् प्रपञ्चोद्द्योतनारुणान् ॥
आलोक्य परमानन्दतन्त्रं तत्तन्त्रटिप्पनं ।
सौभाग्यानन्दसन्दोहाभिधं च त्रिपुरार्णवम् ॥
ज्ञानार्णवादिश्रीतन्त्राण्यपि बुद्ध्या विमृश्य च ।
महागुरोर्विदित्वा च सम्प्रदायमशेषतः ॥
साधकानां मनोहर्षहेतवे गुरुणोदितः ।
सौभाग्यकल्पलतिकां कल्पद्रुमविलासिनीं ॥
श्रीविद्योपास्तिसन्मार्गप्रकाशफलशालिनीम् ।
उन्मेषयामि विशदां परमानन्दधानिकां ॥
कल्पद्रुमोपि सौभाग्यानन्दसन्दोहनिर्भरः ।
न तथा सुखयेत् स्वान्तं संश्रितानां हि सर्व्वथा ॥
यथा सुललिताकारलतासम्वलिताकृतिः ।
कल्पद्रुमः सुखयति साधकाभीष्टदानतः ॥
मन्दानुग्रहणोद्युक्तैर्ग्रन्थलाघवतत्परैः ।
प्रयोगमात्रो रचितस्तच्छास्त्रार्थविवेचनम् ॥
गुरुभिर्न कृतं कल्पद्रुमे तन्त्रस्य टिप्पने ।
विशदं चातिविस्तारादगम्यं मन्दचेतसां ॥
इति मत्वा कृतो यत्नः प्रेरितेनानुजीविभिः ।
गुरुवाक्संश्रयेणापि शुध्यामीति मनीषया ॥

अनादिमलबन्धेन जन्ममृत्युपरम्परां ।
प्राप्तस्य स्वात्मविज्ञानादृते नान्यद्विमोचकम् ॥
तच्चालभ्यमनाराध्य देवतामिति हेतुतः ।
देवतागणसाम्राज्ञ्याः श्रीविद्यायाः प्रसाधने ॥
तन्त्राण्यपश्युकर्माणि शिवाद्युक्तान्यनेकशः ।
महाचार्यैरादृतानि सर्व्वज्ञानफलानि च ॥
तत्र मुख्यन्तु परमानन्दसंज्ञमतिस्फुटम् ।
सात्त्विकाराधनज्ञाननिर्भरं चानपेक्षकम् ॥
तत्पद्धतिः कृता नाथैः कल्पद्रुमसमाह्वया ।
तत्प्रशिष्येण तन्त्रस्य कृता व्याख्या मनोहरा ॥
सौभाग्यानन्दसन्दोहाभिधा विद्यावरेण मे ।
तदर्थसंग्रहं क्षेमानन्द एष करोम्यहम् ॥
स्वपरंपरया प्राप्तं तन्त्रोक्तं न परित्यजेत् ।
स्वतन्त्रोक्तमनल्पं वा स्वल्पं वा सम्यगाचरन् ॥
न लिप्यते कर्म्मलोपदोषैः साधकसत्तमः ।
स्वतन्त्रसूचितं तद्वत् अकृतं चातिदूषितं ॥

The topics dealt with in the work are indicated as follows:—

4A, प्रातःस्मृतिः स्नानमथ सन्ध्या त्रैकालिकी तथा ।
जपः सन्ध्याङ्गभूतोऽपि भूशुद्ध्याद्यङ्गपञ्चकम् ॥
न्यासाः सामान्यमन्त्राणाम् पाठो मुख्यजपस्तथा ।
देवतार्चास्तोत्रवर्म्मनामादिपठनं तथा ॥
धर्म्मानुसेवनं तद्वन्निमित्तार्चा च निष्कृतिः ।
देवतात्मानुसन्धिश्चेत्युद्देशक्रम ईरितः ॥

Beginnings and ends of the different chapters :—

Chapter I:

End :—

4B, श्रीदेवीसाधकानां हि साधनोद्देशलक्षणः ।
सौभाग्यकल्पलतिकास्तवकः प्रथमोऽभवत् ॥

Chapter II:

Beginning (Fol. 4B):—

अथ प्रातःस्मृतिमुखं द्वितीये प्रविविच्यते ।

End (Fol. 7A):—

क्रमक्रियाणां श्रीदेवीसाधकानामभीष्टदः ।
सौभाग्यकल्पलतिकास्तवकोऽयं द्वितीयकः ॥

Chapter III:

Beginning (Fol. 7A):—

अथ भूशुद्ध्यादिविधौ निर्णयः प्रविविच्यते ।
एवं सन्ध्यादिकं कृत्वा भूशुद्ध्यादिकमाचरेत् ॥

End (Fol. 10B):—

आत्मशक्तेः समाधिश्च प्रतोत्तरफलानि वै ।
भूशुद्ध्यादिन्यासविधिपर्य्यन्तक्रम ईरितः ॥
सौभाग्यकल्पलतिकास्तवकोभूत्तृतीयकः ।

Chapter IV:

Beginning (Fol. 10B):—

एवं विन्यस्य तत्पश्चात् सामान्यान् प्रपठेन्मनून् ।
यावतामुपदेशोस्ति ते सामान्याः प्रकीर्त्तिताः ॥

End (Fol. 19A):—

सामान्यमन्त्रपाठादिजपान्तक्रमसंयुतः ।
सौभाग्यकल्पलतिकाचतुर्थस्तवकोऽभवत् ॥

Chapter V:

Beginning (Fol. 19B):—

अथ पूजाविधानन्तु साङ्गोपाङ्गं निरूप्यते ॥

End (Fol. 31B):—

इत्येवं नित्यपूजादिविधानं प्रविवेचितम् ।

इ सौभाग्यल० ।

Chapter VI:

Beginning (Fol. 1A of the second batch of leaves):—

अथोपासकधर्म्माणां क्रियते प्रविवेचनम् ।

सर्व्वस्माद्देवतायान्तु भक्तिः कार्य्या विशेषतः ॥

End (Fol. 13B of the second batch of leaves):—

उपासकानां धर्म्मादिप्रविवेचनसंयुतः ।

सौभाग्यकल्पलतिकाषष्ठस्तवककोऽभवत् ॥

Chapter VII:

Beginning (Fol. 1A of the third batch of leaves):—

श्रीगणेशाय नमः ॥

अथ नैमित्तिकाद्यर्चाविधिरत्र विविच्यते ।

नैमित्तिकं प्रोक्तकाले पूजनं सर्व्वथा भवेत् ।

दिवा नित्यार्च्चनं कृत्वा रात्रौ नैमित्तिकं चरेत् ॥

नित्यमकृत्वा नो कुर्य्यात् क्वचिन्नैमित्तिकार्च्चनम् ।

नैमित्तिके यद्यशक्तो जपेदष्टोत्तरं शतम् ॥

End (Fol. 28B of the third batch of leaves):—

नैमित्तिककाम्यपूजामखकर्म्मनिरूपकः ।

सौभाग्यकल्पलतिकास्तवकः सप्तमोऽभवत् ॥

Chapter VIII:

Beginning (Fol. 28B of the third batch of leaves):—

अथोच्यते देवतायानुसन्धिः क्रमतः स्फुटम् ।

Vidyānandanātha.

6340.

5452. सौभाग्यरत्नाकरः । *Saubhāgyaratnākara.*

Substance, country-made paper. 9 × 4 inches. Folia, 1–92. Lines, 7. Extent in ślokas, 1,650. Character, Nāgara. Appearance, fresh. Incomplete.

MSS of the work, complete in 36 chapters, are described in Bik. No. 1328, Mad. XII. 5756. One MS, belonging to the Indian Museum collection, contains chapters 22–24 with portions of chapters 21 and 25. The present MS contains a portion of the work, e.g., chapters 14 to 20. The last colophon refers to the work by the name *Bhavānīkararatna* but does not give the chapter number. The pre-initiation name of the author is recorded in the Madras MS to have been Śrīnivāsa, who refers to the present work at the end of his *Śivārcanacandrikā*. This and the following two works lay down the procedure of the worship of Tripurā.

Colophons and beginnings of the chapters :—

1, अस्य श्रीसप्तशतिकामन्त्रस्य त्रिलोचन ऋषिः । त्रिष्टुप्छन्दः । सदाशिवो देवता । अर्थधर्मकामार्थे मोक्षार्थे चतुर्विधपुरुषार्थे सिद्ध्यर्थे जपे विनियोगः ।

24A, श्रीविद्यानन्दनाथेन शिवयोः प्रियसूनुना । कृते सौभाग्यरत्नाब्धौ तरङ्गोऽगाच्चतुर्दशः ।

इति श्रीसच्चिदानन्दनाथचरणारविन्दद्वन्द्वान्तेवासिना श्रीश्रीविद्यानन्दनाथेन विरचिते सौभाग्यरत्नाकरे चतुर्दशस्तरङ्गः । अथ योगपीठपूजा ।

31A, ०तरङ्गस्त्रिथिसंज्ञकः । ०पञ्चदशस्तरङ्गः । अथ श्रीचक्रपूजा ।

45A, ०तरङ्गः षोडशो गतः । ०षोडशस्तरङ्गः । अथ गुरुपंक्तिपूजा ।

61A, ०कृते सप्तदशः संगात्तरङ्गो रत्नवारिधौ । ०सप्तदशस्तरङ्गः । अथ पञ्चपञ्चिकाविद्याभिर्दीक्षितश्चेद्विन्दुचक्रे सिंहासनाकारेण.....

73B, ०तरङ्गोऽष्टादशोऽगमत् । ०अष्टादशस्तरङ्गः । अथ षडन्वयशाम्भवाख्योर्द्धाम्नायेन दीक्षायुक्तश्चेत् तन्त्रोक्तमानसादिक्रमषट्कं पूजयेत् ।

90A, ०तरङ्गो ह्यूनविंशतिः । ०एकोनविंशतिस्तरङ्गः । अथ वटुकादिबलिः ।

92A, इति श्रीविद्यानन्दनाथेन विरचितं भवानीकररत्नं सम्पूर्णम् । शुभमस्तु ।

6341.

5928. *Saubhāgyaratnākara.*

Substance, country-made paper. 9×5 inches. Folia, 1 to 22+1 to 113+88 (by counting). Lines, 8, 10. Character, Nāgara. Appearance, old and discoloured. Incomplete.

The present MS contains only the first of the several introductory verses quoted in Mad. XII. 5756.

The only colophon, found in the MS, belongs to the first chapter of the work and runs (Fol. 22A of the first batch of leaves) :—

श्रीविद्यानन्दनाथेन शिवयोः प्रियसूनुना ।
कृते सौभाग्यरत्नाब्धौ तरङ्गः प्रथमोऽगमदिति ॥

The first batch of leaves gives the rules for the morning rites and observance of the *sandhyā*. The second and third batches give the detailed rules of worship.

Rāmacandra.

6342.

6006. सुभगार्चारत्नम् । *Subhagārcāratna.*

Substance, country-made paper. 8×6 inches. Folia, 23. Lines, 14. Extent in ślokas, 450. Character, Nāgara. Appearance, fresh. Incomplete.

MSS of what is probably this work, without the name of the author, containing four and eight chapters, are described respectively in Stein (p. 239) and Bik. 1337. MSS containing the name of the author are mentioned in *Cat. Cat.*, I, p. 727. The present MS contains eight chapters with portions at the beginning and at the end missing.

Beginning :—

युक्तोस्मि तथा करोमि ।

ततोत्थाप्य क्लीं कामदेव सर्व्वजनप्रियाय नमः ।

अनेन मन्त्रेण दन्तशुद्धिं कृत्वा २ श्री १ ॐ श्रीँ क्लीँ श्रीँ कमले कमलालये प्रसीद २ ।

End :—

इति साधारणमुद्राः । विशेषमुद्रालक्षणन्तु आचार्यमुखादवगन्तव्यम् ।

अनेकतन्त्रार्णवकुम्भजन्मा
स रामचन्द्रः सुधियां हिताय ।

Colophons :—

3B, इति सुभगार्चारत्ने प्रथमो मयूखः ; 6A, ॰द्वितीयो मयूखः ; 10B, ॰तृतीयो मयूखः ; 12A, ॰चतुर्थो मयूखः ; 13B, ॰पञ्चमो मयूखः ; 18B, ॰षष्ठो मयूखः ; 22A, ॰सप्तमो मयूखः ।

Saccidānandanātha.

6343.

5779. लघुचन्द्रिका । *Laghucandrikā.*

Substance, country-made paper. 9 × 5 inches. Folia, 77. Lines, 10. Extent in ślokas, 840. Character, Nāgara. Appearance, soiled. Complete (?).

The work may be identical with, or a smaller version of, the *Lalitārcanacandrikā* (*Cat. Cat.*, I. 542, II. 128, 223).

Beginning :—

श्रीगणेशाय नमः । श्रीत्रिपुरसुन्दर्यै नमः ।

वन्दे श्रीगुरुनाथपादयुगलं वन्दे गणानां विभुं
विद्यादानविशारदां शशिमुखीं श्रीशारदाम्बां तथा ।
श्रीविद्याक्रमपूजनं लघुतरं कुर्व्वे प्रमाणं सतां
बालानां व्यवसायिनां विविदुषां सद्भक्तियुक्तात्मनाम् ॥

अथ लघुचन्द्रिका लिख्यते । तत्रादौ विघोद्धारः । तन्त्रराजे ।

Colophons of the different chapters :—

20B, इति सच्चिदानन्दनाथोक्तलघुचन्द्रिकायां आह्निकाख्ये प्रथमप्रकाशः ; 33A, ०न्यासविधानाख्यो द्वितीयः प्रकाशः ; 46A, ०अर्घ्यसाधनादि उपचाराख्ये तृतीयः प्रकाशः ; 70B, ०आवरणपूजनादिदेवीविसर्ज्जनान्ते चतुर्थप्रकाशः ; 76B, ०पञ्चमः प्रकाशः ।

The portion which follows the fifth prakāśa is called आसनोत्थापनविधिः.

Beginning of this portion :—

श्रीगणेशाय नमः । आचम्य प्राणानायम्य ॐ तत्सत् परमेश्वर-प्रीत्यर्थं स्वात्मासनोत्थापनमहं करिष्ये ।

At the end of this portion occur the following lines:—

श्रीगुरुज्ञानानन्दनाथज्ञानशक्तिदेव्यम्बा प्रसन्नोऽस्तु । श्रीराज-राजेश्वरीदेवतार्पणमस्तु ।

Works quoted and referred to :—

23A, वामकेश्वरतन्त्र, ज्ञानार्णव, दक्षिणामूर्त्तिसंहिता, सुभगोदय, त्रिपुर-तापिनी ; 46B, तन्त्रराज ; 76A, सर्वतन्त्र ।

Bhāskararāya.

6344.

10080. **वरिवस्यारहस्यम् ।** *Varivasyārahasya.*

Substance, country-made paper. 10 × 4½ inches. Folia, 48. Lines, 12. Extent in ślokas, 1,300. Character, Nāgara. Date, Śaka 1708 and Saṃvat 1843. Appearance, old. The writing on many of the leaves is faded. Complete.

The text is accompanied by the author's own commentary on it. MSS of it have been described in CS. V. 85, Ulwar. Extr. 666, Mad. XII. 717-8. An edition of it was published by Isvara Chandra Shastri (Calcutta, 1917). It deals principally with the esoteric and spiritual significance of the *mantra* of Tripurā in 16 letters.

Post-colophon Statement :—

वह्निवेदवसुचन्द्रमितेब्दे दिग्विदिग्गगनसप्तशशाङ्कैः ।
निर्म्मितैः सुविमलैर्भुवि शाके पूर्णिमाभृगु + + धृतियोगे ॥

मासिभाद्रपद + + पूर्व्वयाभद्र + + जिदिने व्यलीलिखत् ।
विश्वनाथसुतो रामचन्द्रः शुक्लोपनामकः । वैद्यनाथस्वसंतुष्ट्यै
वरिवस्यारहस्यकं ॥ २ सं १८५३ (?) शा० १७०८ ।

Kāśīnātha.

6345.

6524. **श्रीविद्यामन्त्रदीपिका ।** *Śrīvidyāmantrapradīpikā.*

Substance, country-made paper. 10¼ × 4½ inches. Folia, 4. Lines, 8. Extent in ślokas, 60. Character, Nāgara. Date, Saṃvat 1961. Appearance, fresh. Complete.

This gives the esoteric meaning of a *mantra* of Tripurā and quotes a number of extracts from different original Tantras which primarily deal with meditation and incidentally speak of the real nature of the deity.

Beginning :—

नमामि कामेश्वरपादपङ्कजं करोमि कामेश्वरपूजनं सदा ।
वदामि कामेश्वरनाम निर्म्मलं स्मरामि कामेश्वरतत्त्वमव्ययम् ॥
नत्वा ब्रह्ममयीं देवीं सच्चिदानन्दरूपिणीं ।
ब्रह्मेशविष्णुजननीं भक्तानुग्रहविग्रहाम् ॥
दक्षिणामूर्त्तिपादाब्जभ्रमरीभूतमौलिना ।
रच्यते काशिनाथेन श्रीविद्यामन्त्रदीपिका ॥

Colophon :—

इति श्रीमद्भडोपनामकजयरामभट्टसुतवाराणसीगर्भसम्भवकाशी-
नाथापरपर्य्यायविश्वनाथविरचिता श्रीविद्यामन्त्रदीपिका समाप्ता ।

Post-colophon Statement :—

श्रीललिताम्बार्पणमस्तु ।

मालवीय बालमुकुन्दस्येदं पुस्तकम् । संवत् १९६१ मौः श्रावण वदी ॥ ११ ॥

Cidānandanātha.

6346.

5826. **श्रीविद्यागोपालचरणार्चनपद्धतिः ।** *Śrīvidyāgopāla-caraṇārcanapaddhati.*

Substance, country-made paper. 10 × 4½ inches. Folia, 77. Lines, 10 on a page. Extent in ślokas, 1,848. Character, Nāgara. Date, Saṃvat 1683. Appearance, discoloured. Complete in five chapters.

The work lays down the procedure of the joint worship of the deities Tripurā and Gopāla beginning with a description of the daily rites of the worshipper.

Beginning :—

चित्प्रतिबिम्बादेशादकृत चिदानन्दनाथयोगीन्द्रः ।
मिश्रितपद्धतिमपरामतुलामपि भावनामूलाम् ॥ १ ॥
नमस्कृत्य महेशानं गुरुं गणपतिं हरिं ।
परामम्बां चिदानन्दः पद्धतिं रचयत्यलम् ॥ २ ॥
श्रीविद्यापद्धतिं वीक्ष्य तथा गोपालपद्धतिं ।
उभयोस्तत्त्वमालोच्य मिश्रितार्चनमुच्यते ॥ ३ ॥
स्वदेहद्वारकापुर्य्यां स्वजीवहरिमन्दिरे ।
स्वमात्मानं हरिं ध्यायन् हरिरेव हरिर्भवेत् ॥ ४ ॥

Colophons of the different chapters :—

9A, इति श्रीमद्गगनानन्दनाथपादपूज्यशिष्यश्रीचिदानन्दनाथविरचितायां श्रीविद्यागोपालपद्धतौ प्राभातिक-स्नानसन्ध्यातर्पणस्तोत्रनिरूपणं नाम प्रथमः सङ्केतः ।

32A, इति श्रीमद्गगनानन्दनाथपादपूज्यशिष्यश्रीचिदानन्दनाथलक्ष्मीनाथभट्टापरनामधेययोगीन्द्रविरचितायां श्रीविद्यागोपालपद्धतौ भूतशुद्धिप्राणप्रतिष्ठा-मातृकान्यास-तत्त्वन्यास-योगपीठन्यास-ऋष्यादिषडङ्गन्यास-मूलमन्त्रविद्यासम्पुटितमातृकान्यास-मूलविद्यामन्त्रवर्णन्यास-करशुद्ध्यासनवाग्देवताकूटत्रयन्यास-मानसिकार्चन-जपसमर्पण-ब्रह्मार्पणनिरूपणं नाम द्वितीयः सङ्केतः ।

45A, ०चिदानन्दनाथयोगीन्द्रलक्ष्मीनाथभट्टापरनामधेयविरचितायां श्रीविद्यागोपालपद्धतौ श्रीमण्डपध्यान-महाध्यान-श्रीमण्डपार्चन-शङ्खस्थापन-कलसस्थापन-शान्तिपात्रस्थापन-श्रीपात्रस्थापननिरूपणं नाम तृतीयः सङ्केतः ।

62B, ०श्रीविद्यागोपालचरणार्चनपद्धतौ नवावरणार्चननिरूपणं नाम चतुर्थः पूजासङ्केतः ।

76B, ०श्रीमूलविद्योद्धारक्रमस्तोत्र-श्रीराजगोपालमूलमन्त्रोद्धारक्रमस्तोत्र-पूर्व्वाह्णध्यानपूजा - मध्याह्नध्यानपूजा - सायंकालध्यानपूजार्द्धरात्रध्यानपूजा - सामान्य-तर्पणाकाम्यतर्पणालौकिकप्रयोगधारणायन्त्रपूजास्थाननिरूपण-योगनिरूपणं नाम पञ्चमः सङ्केतः ।

The last colophon is followed by five verses :—

कृष्णभट्टनियुक्तेन लक्ष्मीनाथमनीषिणा ।
यदिदं किञ्चन प्रोचे तेन तुष्यतु केशवः ॥
यस्य प्रभाप्रभवतो जगदण्डकोटि-
कोटिष्वशेषवसुधादिविभूतिभिन्नं ।
तद् ब्रह्म निष्कलमनन्तमशेषभूतं
गोविन्दमादिपुरुषं तमहं भजामि ॥
आसीच्छायाद्वितीयः प्रथममथ विभुर्वत्सडिम्भायितो भू-
देभिः सार्द्धं स्वरूपैस्तदनु पृथुचतुर्बाहुतामाससाद ।
वृत्तस्तत्त्वादिवीतैरथ कमलभवैः स्तूयमानोखिलात्मा
तावद् ब्रह्माण्डसेव्यः स्फुटमजनि ततो यः प्रपद्ये तमीशं ॥
एकस्त्रेधा नयसुनिपुणैर्योगिभिः सेवकैर्वा
निर्बाधं यः सपदि विदितो भाति सर्व्वस्वरूपः ।
सोयं नन्दव्रजमुपगतः साकमाभीरवृन्दैः
वृन्दारण्ये विहरति परानन्दकन्दो मुकुन्दः ॥
व्यामोहाय चराचरस्य जगतस्ते ते पुराणागमाः
तां तामेव हि देवतां परमिकां जल्पन्तु कल्पावधि ।
सिद्धान्ते पुनरेक एव भगवान् विष्णुः समस्तागम-
व्यापारेषु विवेचनव्यतिकरं नीतेषु निश्चीयते ॥

Post-colophon Statement :—

ॐ नमः सर्व्वस्वरूपाय श्रीकृष्णाय। संवत् १६८३ समये आषाढ़कृष्णपञ्चम्यां रवौ लिखितमिदं पुस्तकम् रूपणेन ।

Śambhudevānandanātha.

6347.

6030. **सम्पद्विमर्शिनी ।** *Sampadvimarśinī.*

Substance, country-made paper. 10 × 4¼ inches. Folia, 11 to 60. Lines, 8. Extent in ślokas, 1,000. Character, Nāgara. Date, Śaka 1588. Appearance, discoloured. Incomplete.

This and the following two works lay down the detailed procedure of the worship of Tripurā.

End :—

व्योमचक्रसमारूढे भुवनान्तरचारिणि ।
चरुकं देहि मे मातः प्रसादं कुरु भैरवि ॥

इति मन्त्रेण चरुं गृहीत्वा परमानन्दनिर्भरः सन् मन्मन्यते शिवो भूत्वा सुखं विहरेत् ।

Colophon :—

इति श्रीमत्प्रसन्नविश्वात्मक-देशिकेन्द्रचरणाम्बुजान्तेवासिना श्रीशम्भुदेवानन्दनाथेन विरचिता सम्पद्विमर्शिनी नाम्नी सुन्दरी-पूजापद्धतिः समाप्ता ।

Post-colophon Statement :—

स्वस्ति श्रीशाके १५८८ समये भाद्रपदि द्वादशी बुधवारे मनोरथेन लिखितमिदम् ।

Śambhu Bhaṭṭa.

6348.

10549. **सुन्दरीमहोदयः ।** *Sundarīmahodaya.*

Substance, country-made paper. 10 × 5 inches. Folia 22–37, of which 33 and 35 are missing. Lines, 10. Character, Nāgara. Date, Saṃvat 1744. Appearance, old, discoloured. Incomplete.

The present MS contains the major portion of the sixth chapter of the work. IO. IV. 2599 describes a MS of the work complete in five chapters. The last verse in the present MS agrees with one of the concluding verses of the MS of the India Office. The portion contained in the present MS lays down the procedure of the worship of, as well as of festive rites in connection with, Tripurā.

End :—

यदत्र किञ्चित् लिखितं मया त-
न्न नव्यमस्तीत्यवहेलनीयम् ।
यतो हि मूलार्थनिबद्धमार्गं
विमृश्य सद्भिः परिभाव्यमेव ॥

Colophon :—

इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीरामानन्दनाथसरस्वती-
शिष्यशङ्करानन्दनाथकविमण्डनशम्भुभट्टकृत-सुन्दरीमहोदयान्तर्गतः
षष्ठो नित्यनैमित्तिकपूजोल्लासः चरमः समाप्तः ।

Post-colophon Statement :—

संवत् १७४४ चैत्र शुद्ध ६ बुधे नित्यकवडोपनामकगोविन्देन
लिखितोऽयं ग्रन्थः । श्रीमहात्रिपुरसुन्दर्य्यै नमः । श्रीरस्तु ।

Rāma Bhaṭṭa.

6349.

5781. सुन्दरीसपर्या । *Sundarīsaparyā.*

Substance, country-made paper. 9 × 4 inches. Folia, 26 (of which fol. 6 is missing). Lines, 9 to 10. Extent in ślokas, 520. Character, Nāgara. Appearance, old and worm-eaten. Incomplete.

Beginning :—

श्रीगणेशाय नमः ।

अखण्डानन्दबोधाय नित्याय परमात्मने ।
चित्संक्रान्तस्वरूपाय कृष्णाय गुरवे नमः ॥
विज्ञाय सर्व्वतन्त्राणि गुरुवक्त्राच्च तत्त्वतः ।
सुन्दरीयजनं वक्ष्ये रामभट्टो विविक्तधीः ॥

तत्र तावत् प्रातःकृत्यादि विधाय

तीक्ष्णदंष्ट्रमहाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥

इति भैरवाज्ञामादाय जपस्थानं मूलेन संप्रोक्ष्य ...

Colophon :—

इति श्रीकृष्णभट्टान्तेवासिना रामभट्टेन सभारञ्जकोपनाम्ना विरचितायां सुन्दरीसपर्य्यायां द्वितीय + + +

The colophon of the first chapter, possibly occurring in the missing leaf, is not found.

Ratnanābhāgamācārya.

6350.

4184. सुन्दरीरहस्यवृत्तिः । *Sundarīrahasyavṛtti.*

Substance, country-made paper. 16 × 3 inches. Folia, 1–194 (marked on the right-hand margin, as 134 to 326). Fol. 17B, 18, 19A, 155B, 156 are blank. Lines, 4, 5. Extent in ślokas, 2,800. Character, Bengali. Date, Śaka 1699. Appearance, fresh. Complete.

The work deals with the details of the worship of Tripurā.

Beginning :—

नमस्त्रिपुरसुन्दर्यै ।

आचार्य्यनारायणभीतपादं प्रणम्य सर्व्वागमतत्त्ववेत्ता ।
श्रीसुन्दरीरन्यरहस्यवृत्तिं श्रीरत्ननाभः स्वमतिस्तनोति ॥
सुन्दरीं केशवाचार्य्यं वल्लभाचार्य्यमन्वतः ।
ततो विद्याधराचार्य्यं हयग्रीवं महागुरुम् ॥
गोपीनाथगुरुं नत्वा रत्ननाभस्ततः परम् ।
तनोति सुन्दरीमन्त्रान् नानातन्त्रनिदेशितान् ॥
विलोक्याखिलतन्त्राणि ज्ञात्वा गुरुमतं तथा ।
वच्येहं सुन्दरीपूजां नानातन्त्रनिदेशिताम् ॥
शिववाक्येन कुत्रापि कुत्रापि व्यासवाक्यतः ।
कुत्राप्यन्यप्रबन्धेन ग्रन्थवर्य्यः प्रतन्यते ॥
श्रीसुन्दरीं गुरुं नत्वा गोपीनाथं तथा गुरुम् ।
गणेशं भारतीं नत्वा वच्ये ग्रन्थं सुविस्तरम् ॥
प्रकृतेर्दश तत्त्वानि शिवेनोक्तानि जामले ।
तत्सङ्ख्यापटलैर्ग्रन्थं वच्याम्यत्र सुनिश्चितम् ॥
आरम्भादिसमाप्यन्तं यद्वृत्तं ग्रन्थवर्य्यके ।
तत्सर्व्वं निर्णयं कृत्वा कथयामि समासतः ॥

End :—

कृता श्रीरत्ननाभेन सुन्दरीपदपूर्व्विका ।
रहस्यवृत्तिकाख्या सा मन्त्रपूजासमन्विता ॥
वारेन्द्राग्रकुले जातो रत्ननाभः श्रिया युतः ।
मैत्रेयकुलसंजातो गोत्रश्च का[श्य]पाह्वयः ॥
नारायणसुतोऽहञ्च मुकुन्दस्य च पौत्रकः ।
श्रीमान्नाममहात्मात्मप्रपितामह ईरितः ॥

Colophons of the different chapters :—

29B, इति श्रीरत्ननाभागमाचार्य्यविरचितायां सुन्दरीरहस्यवृत्तौ द्वितीयः पटलः ; 39A, ०विद्योद्धारः तृतीयः पटलः ; 48A, ०कामबीजकीलितोद्धारः

चतुर्थः पटलः; 69A, ०त्रिपुरसुन्दरीमन्त्रभेदकथनं नाम पञ्चमः पटलः; 87A, न्यासविधानं नाम षष्ठः पटलः; 115B, ०श्रीत्रिपुरसुन्दरीपूजाविधानं नाम सप्तमः पटलः; 144A, ०जपहोमविधानं नाम अष्टमः पटलः; 163A, ०नवमः पटलः (this deals with the six black rites); 194A, ०योगनिर्णयो नाम दशमः पटलः।

Post-colophon Statement:—

शाके नन्दाङ्कभूपे लिपिरियं। लिखितं श्रीअनुपरामशर्म्मणा। पुस्तकमिदं स्वाक्षरं अन्याक्षरञ्च किञ्चित् अन्याधिकारो नास्ति। शकाब्दाः १६९९। यथा दृष्टं तथा लिखितं लेखको नास्ति दूषणम्। भौमस्यापि रणे भङ्गो मनीनाञ्च मतिभ्रमः॥

Nijānandanātha.

6351.

5537. क्रमोत्तमः। *Kramottama.*

Substance, country-made paper. 10 × 4½ inches. Folia, 112. Lines, 9. Extent in ślokas, 2,400. Character, Nāgara. Appearance, good. Complete.

The work deals with the morning duties of a worshipper and the details of the worship of Tripurā including a detailed treatment of the *nyāsas*. MSS of the work are described under different names in different catalogues, e.g. *Gadyavallarī* (L. VII. 2261), *Śrīvidyāpaddhati* (Bik. No. 1335), *Kramottamapaddhati* (Bik. No. 1283), *Mahātripurasundarīpādukārcanakramottama* (IO. IV. 2600). The MS described in L, which runs up to the end of chapter 3 of the Society's MS, constitutes, according to the last colophon, the first part of the *Gadyavallarī*, while the last colophon in the MS described in Bik. No. 1335, which is complete in four chapters, refers itself to the second part of it. Verses occurring at the end of chapter 2 of the present MS state

that the work was based on the *Gadyavallarī* a colophon of which is found in the earlier section of the work. It refers to *Sundarācāryapaddhati* (Fol. 52B).

Beginning :—

श्रीन्टसिंहगुरुं वन्दे साक्षान्नारायणात्मकम् ।
चिदानन्दघनं पूर्णं कारुण्यामृतसागरम् ॥
तदनुग्रहसम्पूर्णं माधवेन्द्रसरस्वतीं ।
प्रकाशानन्दसन्मात्रं गुरूत्तममहं भजे ॥
यदङ्घ्रिस्पर्शनादेव भालदुष्टाक्षरावली ।
शुभायते भजे तं श्रीमाधवेन्द्रसरस्वतीम् ॥
प्रशास्महे नमोवाकं विमलानन्दमूर्त्तये ।
शुभाय करुणार्द्राय(र्द्रोपि) गुरुरूपमुपेयुषे ॥
स्वप्रकाशविमर्षाख्यबीजाङ्कुरलतां (धि)पराम् ।
षट्कोणपीठनिलयां वन्दे त्रिपुरसुन्दरीम् ॥
ब्राह्मे मुहूर्त्ते चोत्थाय ब्रह्मरन्ध्रे सिताम्बुजे ।
चिच्चन्द्रमण्डले शुद्धस्फटिकाक्षवराभये ॥
दधानं रक्तया शक्त्या श्लिष्टं वामाङ्कसंस्थया ।
धारयन्त्योत्पलं दीर्घं नेत्रत्रयविभूषितम् ॥

Colophons :—

7A, इति श्रीनिजप्रकाशानन्दनाथमल्लिकार्जुनयोगीन्द्रविरचितायां गद्यवल्लर्यामजपा[र्पणस्नानसन्ध्या]तर्पणनिरूपणं नाम सः प्रथमः ।

52B, इति श्रीक्रमोत्तमे निजानन्दविरचिते संहाररूपश्रीचक्रन्यासस्य सम्पूर्णतामगमत् ।

62B, इति श्रीक्रमोत्तमाख्यायां निजानन्दनाथविरचितायां श्रीविद्यापद्धतौ न्यासविवरणं नाम द्वितीयोल्लासः; 73B, इति निजात्माप्रकाशानन्दविरचितायां क्रमोत्तमाख्यायां श्रीप्रासादपरापद्धतौ न्यासविधिर्नाम तृतीयोल्लासः ।

92B, क्रमोत्तमेऽप्यशक्तानां मनूनां गणनाक्रमे ।
अजीगणन्निजानन्दः सुन्दरीचिपुराक्रमम् ॥

श्रीक्रमोत्तमे मल्लिकार्जुनयोगीन्द्रकृते पूजापटलः ।

106A, इति श्रीवामकेश्वरतन्त्रे नित्याषोडशार्णावरणचक्रे सौभाग्यकवचं नाम त्रयस्त्रिंशत् पटलः; 112, इति श्रीरुद्रयामले अन्नपूर्णेश्वर्याः पञ्चाशिकाकल्पवल्ली सम्पूर्णा । क्रमोत्तमोऽपि समाप्तम् ।

Verses at the end of the colophons are quoted below (based on a collation of the two MSS belonging to the Society).

62B, वामकेश्वरतन्त्रे या पूर्वोत्तरचतुःशती ।
तामालोक्य च वल्लर्या मतमालम्ब्य कृत्स्नशः ॥
गुरूपदेशमार्गेण तदनुज्ञापुरःसरम् ।
निजात्मानन्दनाथाख्यमल्लिकार्जुनयोगिराट् ॥
अरीरचन्न्यासजालं श्रीविद्याया क्रमोत्तमम् ।
न्यासकाण्डे सूचितं यत्कुर्यादष्टाष्टकं त्विति ॥
निजात्मानन्दयोगीन्द्रश्चक्रे सिंहावलोकनम् ।
शान्तिके पौष्टिके चैव कुर्यादष्टाष्टकं बुधः ॥

73B, गुरुदेवात्मनामैक्यं सद्विद्यातिविशारदः ।
अरीरचन्निजानन्दः श्रीप्रासादपराक्रमम् ॥
स्वच्छप्रकाशगुरुपादयुगप्रपन्नः
श्रीमल्लिकार्जुन इति प्रथितो निजात्मा ।
श्रीमत्कलार्णवमहोदधिमुन्मथित्वा
सम्यग्रूपयदतीवमहोर्द्धघोढाम् ॥
निजात्मानन्दसम्मोक्ता पराप्रासादपद्धतिः ।
महाषोढान्यासयुता जयतां शाश्वतीः समाः ॥

6352.

8541. *Kramottama.*

Substance, country-made paper. $10\frac{1}{2} \times 5$ inches. Folia, 96. Lines, 10. Extent in ślokas, 1,800. Character, Nāgara. Appearance, old. Incomplete (?).

Occasionally the present MS seems to represent an abridged version of the text as found in the previous MS. The second colophon of the previous MS is absent here though the topics, dealt with in the section containing it, come to an end on Fol. 49A. The third chapter is here wrongly put as chapter 1 in the colophon on Fol. 69B. Portions following this colophon do not agree with similar portions in the previous MS. These portions in the present MS deal with various types of *nyāsa*, e.g. *ṣaḍādhāra-vidyānyāsa*, *caraṇādinyāsa*, etc. Some additional verses are found at the beginning of the present MS which agree with those occurring in the MSS described in L. VII. 2261 and Bik. No. 1335. A verse at the end of the colophon of chapter 3 (Fol. 69B), which is also found in L. VII. 2261, gives the date of composition of the work:—

श्रीमुखाब्दे शके बाण-त्रिवेदशशिसम्मिते ।
याम्यायने सिते मार्गे गुरावेकादशीदिने ॥

Additional verses at the beginning of the MS:—

श्रीशिवाय नमः ।

शिव [अ]दौ गुरुः प्रोक्तस्तस्माद्विष्णुः प्रजापतिः
ततो ब्रह्मा वशिष्ठश्च ततः शक्तिः पराशरः ॥ १ ॥
व्यासः शुको गौडपादो गोविन्दाख्यो गुरुः परः ।
ततः श्रीशंकराचार्य्यो विश्वरूपाचार्य्य एव च ॥ २ ॥
ततो बोधघनाचार्य्यः ततो ज्ञानघनाह्वयः ।
ज्ञानोत्तमशिवः पश्चात् ततो ज्ञानगिरिः स्मृतः ॥ ३ ॥

ततः सिंहगिरिः पश्चात् ईश्वरस्तीर्थसंज्ञितः ।
ततो नृसिंहतीर्थश्च विद्यातीर्थशिवस्तथा ॥ ४ ॥
भारतीतीर्थनामा च विद्यारण्यगिरिः परः ।
ततः श्रीमलयानन्दः देवतीर्थसरस्वती ॥ ५ ॥
यादवेन्द्रसरस्वत्यः परं कृष्णसरस्वती ।
ततः श्रीमद्गुरुः प्रोक्तः श्रीनृसिंहसरस्वती ॥ ६ ॥
ततस्तु श्रीगुरुश्रेष्ठो माधवेन्द्रसरस्वती ।
मल्लिकार्ज्जुनयोगीन्द्रस्तच्छुश्रूषाप्तभैरवः ॥ ७ ॥
ततः श्रीरामदेवाख्यः शिवः श्रीगुरुरूपधृक् ।
दायदेवयतिः पश्चात् जगदानन्दसंज्ञितः ॥ ८ ॥
श्रीमद्गङ्गाधरानन्दनाथः स्यात्तदनन्तरं ।
एते वै गुरवः प्रोक्ताः शिवादिस्वगुरुक्रमात् ॥ ९ ॥

Rāmānanda.

6353.

10155. **दत्तार्चनचन्द्रिका ।** *Dattārcanacandrikā.*

Substance, country-made paper. $8\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 1–75. Lines, 7. Extent in ślokas, 875. Character, Nāgara. Appearance, fresh. Complete.

The present MS is stated to contain three chapters of the work, a MS of which is in the Adyar Library (*Cat. Cat.*, III. 53). Colophons of the chapters are not found here. This and the following two works lay down the procedure of the worship of Tripurā.

Beginning :—

श्रीगणेशाय नमः । श्रीगुरुचरणकमलेभ्यो नमः ।

श्रीब्राह्मे मुहूर्त्ते चोत्थाय ब्रह्मरन्ध्रस्थश्वेतसहस्रदलकमलकर्णिकायां अकथासनोपविष्टं वामाङ्कगतरक्तविमर्शशक्तियुतं श्वेतवस्त्राभरण-

माल्यानुलेपनं ज्ञानमुदितं त्रिनेत्रं चन्द्रकान्तिसमद्युतिं जटिलकपिल-जटाजूटं सुप्रसन्नशान्तं शिवरूपिणं श्रीगुरुं ध्यात्वा तच्चरणारविन्द-युगलविगलितामृतधाराभिः स्वदेहं परिप्लुतं विभाव्य प्रणवत्रितार-मूलविद्यादिन[ा] नित्यविद्यान्ते हंसः शिवः सोहंस्वरूपनिरूपणहेतवे स्वगुरवे नमः श्रीगुरुपादुकां पूजयामि इति मानसोपचारैः पञ्चतन्मात्रैर्यथाविधि संपूज्य गुरुस्तोत्रं पठेत् ।

End :—

कृष्णपक्षे चित्रादिकामेश्वर्य्यान्तं विलोमेन प्रत्यहमेकैकं जपदशांशं जपेत् । तिथिवृद्धौ तु एकां नित्यां दिनद्वये जपेत् । तिथिक्षये तु नित्याद्वयमेकस्मिन् दिने जपेत् पुनः प्राणायामादिन्यासान्तं कृत्वा ध्यात्वा गुह्याति० जपं देव्यै समर्प्य ॥

Last Colophon :—

इति श्रीपरमहंसपरिव्राजकाचार्य्यकृष्णानन्दसरस्वतीभगवत्पूज्य-पादशिष्याचार्य्यश्रीरामानन्दकृतौ दत्तार्चनचन्द्रिकायां नित्यकर्म्मानु-ष्ठानविधिपरिच्छेदत्रयं संपूर्णम् ।

Sāhib Kaulānandanātha.

6354.

6021. श्रीविद्यानित्यपूजापद्धतिः । *Śrīvidyānityapūjā-paddhati.*

Substance, country-made paper. 7 × 4½ inches. Folia, 245. Lines, 9. Extent in ślokas, 2,700. Character, Nāgara. Appearance, fresh. Complete.

Beginning :—

श्रीगुरवे शिवाय ॐ नमः । ॐ गणेशाय नमः । श्रीः ॐ ।

श्रीभैरव उवाच ।

ॐ अधुना पद्धतिं वक्ष्ये श्रीविद्यार्चनसंयुताम् ।
गद्यपद्यमयीं गोप्यां सकलागमनिश्चिताम् ॥

प्रात्यःकृत्यामकृत्वा तु यो देवीं भक्तितोऽर्चयेत् ।
तस्य पूजा तु विफला शौचहीना यथा क्रिया ॥

End :—

महामाहेश्वराचार्य्यैः साहिब्कौलाभिधाश्रमे ।
अवतीर्णैः समालोक्य भूरितन्त्राणि शक्तितः ॥
नाविस्तरातिविस्तारा सैषा पद्धतिरर्थितैः ।
अनुग्राह्यजनैः श्रीमच्छ्रीविद्याया विनिर्म्मिता ॥

Colophon :—

इति श्रीमच्छ्रीमहामाहेश्वराचार्य्यवर्य्यसाहिब्कौलानन्दनाथ-श्रीपादुकाविरचिता श्रीविद्यानित्यपूजापद्धतिः सम्पूर्णा ।

Post-colophon Statement :—

कृष्णभट्टस्य पठनार्थम् ।

Kāśīnātha.

6355.

6530. **त्रिपुरसुन्दर्य्यर्चनक्रमः ।** *Tripurasundaryarcanakrama.*

Substance, country-made paper. 9½ × 6 inches. Folia, 26. Lines, 11. Extent in ślokas, 520. Character, Nāgara. Appearance, fresh. Complete.

Beginning :—

श्रीगणेशाय नमः । श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः ।
अनेकशक्तिसंघातप्रकाशलहरी + + ।
शुद्धसंविन्मयः पायात् श्रीशम्भुः परमेश्वरः ॥
अनाद्यायाखिलाद्याय मायिने गतमायिने ।
अरूपाय सरूपाय दक्षिणामूर्त्तये नमः ॥
नत्वा श्रीशङ्कराचार्य्यचरणाम्भोरुहद्वयम् ।
काशीनाथः प्रतनुते संहितोक्तार्चनक्रमम् ॥

प्रातरुत्थाय शिरसि संस्मरेत् पद्ममुज्ज्वलम् ।
कर्पूराभं स्मरेत्तत्र श्रीगुरुं निजरूपिणम् ॥

End :—

अतिदरिद्रस्य उपचारासम्भवे तु ।
ध्यात्वाथवा चक्रराजं मनःपूजासमन्वितः ।
जपारम्भं सुधीः कुर्यान्महापातकहा भवेदिति ॥
मनसोऽपि नैश्चल्याभावेऽशक्तौ तु (तु) ।
मामर्चयतु वा मा वा(ना) विद्यां जपतु वा न वा ।
कीर्त्तयेन्नामसाहस्र(ी)मदो मत्प्रीतये सदेति ॥
विहितकेवलसहस्रनामपाठं कुर्यादिति संक्षेपः ।

Colophon :—

इति श्रीमद्भडोपनामकजयरामभट्टसुतवाराणसीगर्भसम्भव-काशीनाथविरचितं श्रीदक्षिणामूर्त्तिसंहितोक्तं श्रीमहात्रिपुर-सुन्दर्य्यर्चनक्रमं समाप्तम् ।

Pūrṇānanda.

6356.

122. श्रीतत्त्वचिन्तामणौ षट्चक्रनिरूपणम् ।

Ṣaṭcakranirūpaṇa from the Śrītattvacintāmaṇi.

Substance, country-made paper. 15½ × 3½ inches. Folia, 6. Lines, 7. Extent in ślokas, 150. Character, Bengali. Date, Śaka 1765. Appearance, tolerable. Complete.

This constitutes the sixth chapter of the *Śrītattva-cintāmaṇi* (Calcutta Sanskrit Series, No. XIX—Calcutta, 1936) though only a few of the MSS described here record this fact. There exists some controversy with regard to its origin. According to one commentator this work

forms part of the *Kaivalyakalikātantra*, while according to some MSS it is a commentary by Pūrṇānanda on the *Virupākṣapañcāśikā* of Virupākṣanātha (Hultzsch—*Reports on Sanskrit MSS in Southern India*, No. I, Madras, 1895). Some MSS attribute it to Brahmānanda. The present MS and the following one refer to it as *Ṣatcakrabheda*.

Post-colophon Statement :—

शकाब्दा १७६५ लिपिरियं फाल्गुनस्य तृतीयदिवसीया ।

6357.

2892. *Ṣaṭcakranirūpaṇa from the Śrītattvacintāmaṇi.*

Substance, country-made yellow paper. 17 × 4½ inches. Folia, 8. Lines, 5. Extent in ślokas, 150. Character, Bengali. Appearance, fresh. Complete.

The following additional verse is found in this MS after the concluding verse of the work :—

पूर्णानन्दगिरिर्गिरीन्द्रतनयापादाम्बुजान्निःसृतं
सारात्सारतरं निगम्य तरसा योगार्ण + + + + ।
ब्रह्मानन्दगिरीन्द्रपादपदवीमाज्ञाय शश्वत् क्षितौ
मोक्षज्ञानसुधाभिलाषलसतां संकल्पसंसिद्धये ॥

6358.

3164. *Ṣaṭcakranirūpaṇa from the Śrītattvacintāmaṇi.*

Substance, country-made paper. 15 × 3 inches. Folia, 10. Lines, 4. Extent in ślokas, 150. Character, Bengali. Date, Śaka 1764. Appearance, fresh. Complete.

The colophons in the present MS and the following one refer to the work as the sixth chapter of the *Śrītattvacintāmaṇi* and call it *yogavivaraṇa*.

Post-colophon Statement :—

समाप्तश्चायं ग्रन्थ इति ।

शाक १७६४ ॐ गुरुः ॐ परमदेवतायै नमः ।

6359.

4682. *Ṣaṭcakranirūpaṇa from the Śrītattvacintāmaṇi.*

Substance, country-made yellow paper. 16 × 3¾ inches. Folia, 7. Lines, 6. Extent in ślokas, 150. Character, Bengali. Appearance, fresh. Complete.

6360.

6602. *Ṣaṭcakranirūpaṇa from the Śrītattvacintāmaṇi.*

Substance, country-made paper. 16 × 2½ inches. Folia, 6, marked 115–120. Lines, 5. Extent in ślokas, 150. Character, Bengali. Date, Śaka 1640. Appearance, fresh. Complete.

The colophons in the present MS as also in a MS in the old collection (I.G. 7) attribute the work to Brahmānanda and call it *Ṣaṭcakrakrama :—*

इति श्रीब्रह्मानन्दगिरिकृतः षट्चक्रक्रमः समाप्तः ।

Post-colophon Statement :—

